उत्थितनिविष्टभोजिनः दिवा क्षमणं च षष्ठद्विकम् ॥

**उट्ठिदणिविट्ठभोजिस्स अण्णेहिं विजाणिदस्स दिवसम्मि ।**
**लहुमासो गुरुमासो रयणिभोजिस्स पुव्वुत्तं ॥१५२॥**

---

१ एगं णिसण्णदी स दु क ।

उत्थितनिविष्टभोजिनः अन्यैः विज्ञातस्य दिवसे ।
लघुमासः गुरुमासः रजनीभोजिनः पूर्वोक्तं ॥

उत्तरगुणं–इत्युत्तरगुणाः ।

---

**अण्णाणअहंकारेहिं एगबहुवारमासए छेदो ।**
**अप्पासुगे वसंतस्सुववासो पणय मासिगं मूलं ॥१५३॥**

अज्ञानाहंकाराभ्यां एकबहुवारमाश्रित्य छेदः ।
अप्रासुके वसतः उपवासः पंचकं मासिकं मूलं ॥

**अ[1]ण्णाणधम्मगारवहेदूहिं गामपुरघरारंभे ।**
**भासंतस्सुवसोही पणगं संठाणगं मूलं ॥ १५४ ॥**

अज्ञानधर्मगर्वहेतुभिः ग्रामपुरगृहारंभान् ।
भाषमाणस्योपशुद्धिः पंचकं संस्थानकं मूलं ॥

**पूजारंभं जो कारवेदि अण्णाणदो गिहत्थेहिं ।**
**इगिवारे सालोयण विउसग्गो खमणमेगं तु ॥ १५५ ॥**

पूजारम्भं यः कारयति अज्ञानतो गृहस्थैः ।
एकवारे सालोचनः व्युत्सर्गः क्षमणमेकं तु ॥

**बहुवारेसु य पणगं सपडिक्कमणं तु तस्स दायव्वं ।**
**जाणंतस्सिगिवारे सपडिक्कमणं पणगमेगं ॥ १५६ ॥**

बहुवारेषु च पंचकं सप्रतिक्रमणं तु तस्य दातव्यं ।
जानानस्य एकवारे सप्रतिक्रमणं पंचकमेकं ॥

---

१ अण्णाणधम्मगारवेहिं जदि गामपुरघरारंभं इति क–पुस्तके पाठः । २ वा. ख ।

**बहुवारे गुरुमासो दायव्वो तस्स पडिकमणं ।**
**छज्जीवणिकायाणं बहूण घायम्मि मूलखिदी ॥ १५७ ॥**

बहुवारे गुरुमासो दातव्यस्तस्य सप्रतिक्रमणः ।
षड्जीवनिकायानां बहूनां घाते मूलक्षितिः ॥

**तित्थयरादीणमवण्णवादिणो संघस्स अयसकारिस्स ।**
**पब्भट्ठवदसमासेविणाय खमणं सपडिक्कमणं ॥ १५८ ॥**

तीर्थकरादीनामवर्णवादिने संघस्य अयशस्कारिणे ।
प्रभ्रष्टव्रतसमासेविने क्षमणं सप्रतिक्रमणं ॥

**वाहिपडिकारहेदुं वमणं च विरेयणं सिरावेधं ।**
**णियदेहे काराविदमुणिणो छट्ठत्तवं छेदो ॥ १५९ ॥**

व्याधिप्रतिकारहेतुः वमनं च विरेचनं च सिरावेधं ।
निजदेहे कारापितमुनये षष्ठतपः छेदः ॥

**अण्णे भणंति एदं पायच्छित्तं सदप्पदोसस्स ।**
**वुत्तं पमादजादस्स होइ एयस्स अद्धमिदि ॥ १६० ॥**

अन्ये भणन्ति एतत्प्रायश्चित्तं सदर्पदोषस्य ।
उक्तं प्रमादजातस्य भवति एतस्य अर्धमिति ॥

**जो दंसणपब्भट्ठं घेत्तूणं संजदो विहारिज्ज ।**
**पायछित्तं तस्स य मूलगुणं होइ दायव्वं ॥ ६१ ॥**

यः दर्शनप्रभ्रष्टं आदाय संयतः विहरेत् ।
प्रायश्चित्तं तस्य च मूलगुणं भवति दातव्यं ॥

---

१ अंयसंसकारिस्स. ख । २ एवं. ख ।

**विज्जाचोज्जणिमित्तं मंतं चुण्णाणि मूलकम्मणं च[1] ।**
**जो कुणदि सादहेदुं[2] तस्सुववासो सपडिकमणो ॥ १६२ ॥**

विद्यातोद्यनिमित्तं मंत्रं चूर्णानि मूलकर्म च ।
यः करोति सादहेतुं तस्योपवासः सप्रतिक्रमणः ॥

**सालोयणविउसग्गो सुत्तत्थं चोरियाए गेण्हंतो ।**
**पुच्छाविणयविहीणो दिंतो[3] वि य पुच्छमगणंतो ॥ १६३ ॥**

सालोचनव्युत्सर्गः सूत्रार्थं चुर्या गृह्णन् ।
पृच्छाविनयविहीनः ददत् अपि च पृच्छामगणयन् ॥

**सुत्तत्थमुवदिसंतो असमाहिं सिक्खयाण जो कुणइ ।**
**सुदगुरुणिण्हवगो जो तस्स य खमणं हवदि छेदो ॥ १६४ ॥**

सूत्रार्थमुपदिशन् असमाधिं शिष्याणां यः करोति ।
श्रुतगुरुनिन्हवको यः तस्य च क्षमणं भवति च्छेदः ॥

**सिक्खंतो सुत्तत्थं अणिमादो चेव गच्छदि परत्थं ।**
**कोहादिकारणेहिं तस्स चउत्थं हवे छेदो ॥ १६५ ॥**

शिक्षन् सूत्रार्थं अनियमतः चैव गच्छति परत्र ।
क्रोधादिकारणैः तस्य चतुर्थं भवेच्छेदः ॥

**संथारमसोहिंतस्स पयदअपयदचारिणो होंति ।**
**खमणद्धं खमणं च[4] य अण्णे खमणं च पणगं च ॥ १६६ ॥**

संस्तरमशोधयतः प्रयत्नाप्रयत्नचारिणः भवंति ।
क्षमणार्धं क्षमणं च च अन्यस्मिन् क्षमणं च पंचकं च ॥

---

१ मूलकम्मं च. ख । २ सदेहेदुं. क । ३ दिंति. ख । ददाति । ४ चेय. ख । चैव ।

**णट्ठे अयउवयरणे तस्सुच्छेहंगुलप्पमाणाइं ।**
**खवणाइं देंति केई घणंगुलपमाणाइं परे ॥ १६७ ॥**

नष्टे अयउपकरणे तस्योत्सेधाङ्गुलप्रमाणानि ।
क्षमणनि ददति केचित् घनाङ्गुलप्रमाणानि परे ॥

**जिणपडिमागमपोच्छयणासे खमणादिएगकल्लाणं ।**
**मणिरयणकणयपडिमाणासे पणगादिमासियं छेदो ॥ १६८ ॥**[1]

जिनप्रतिमागमपुस्तकनाशे क्षमणाद्येककल्याणं ।
मणिरत्नकनकप्रतिमानाशे पंचकादिमासिकं छेदः ॥

**सेसुवयरणविणासे रूवादीणं च घादकरणे य ।**
**काउस्सग्गो छेदो मणदुप्परिणामकरणे य ॥१६९ ॥**

शेषोपकरणविनाशे रूपादीनां च घातकरणे च ।
कायोत्सर्गः छेदः मनोदुष्परिणामकरणे च ॥

**जे वि य अण्णगणादो णियगणमज्झयणहेदुणायादा ।**
**तेसिं पि तारिसाणं आलोयणमेव संसि ( सु ) द्धी ॥ १७० ॥**[2]

येऽपि च अन्यगणतः निजगणे अध्ययनहेतुना आयाताः ।
तेषामपि तादृशानां आलोचना एव संशुद्धिः ॥

**आयरियादिरिसीहि य आणावियदीवयपवंचेण ।**
**सण्णासादिणिमित्तं जिणभवणं जइ पमाएण ॥ १७१ ॥**

आचार्यादि—ऋषिभिः आज्ञापितदीपकप्रपंचेन ।
सन्यासादिनिमित्तं जिनभवनं यदि प्रमादेन ॥

---

१ इदं गाथासूत्रं ख–पुस्तके १६१ गाथासूत्रतः पूर्वं १६२ गाथासूत्रतश्च पश्चाद् वर्तते । २ इदं गाथासूत्रं ख–पुस्तकेऽत्र स्थले नास्ति ।

**दड्ढं हवेज्ज तो सो पक्खुववासं करेज्ज संघवई ।**
**तिर्णि[1] पडिकमर्णा[2] पंच पंच उववासपरियंतं[3] ॥ १७२ ॥**

दग्धं भवेत्तर्हि स पक्षोपवासं कुर्यात् संघपतिः ।
तिस्रः प्रतिक्रमणाः पंचपंचोपवासपर्यन्ताः ॥

**अह जइ सत्तिविहीणो तो तिण्णि दुवालसाइं कुणउ मुणी ।**
**तिणि पडिकमणंताइं तप्पडिबद्धो तवो अहवा ॥ १७३ ॥**

अथ यदि शक्तिविहीनः तर्हि त्रीन् उपवासान् करोतु मुनिः ।
त्रीणि प्रतिक्रमणान्तानि तत्प्रतिबद्धं तपोऽथवा ॥

चूलिको-इति चूलिका ।

---

**आलोयण पडिकमणो उभय विवेगो तहा विउस्सग्गो ।**
**तव परियायच्छेदो मूलं परिहार सद्दहणा ॥ १७४ ॥**

आलोचना प्रतिक्रमणं उभयं विवेकः तथा व्युत्सर्गः ।
तप पर्यायच्छेदः मूलं परिहारः श्रद्धानं ॥

**एवं दसविध समए पायच्छित्तं रिसीर्गणे[4] भणियं ।**
**तं केरिसेसु दोसेसु जायदे इदि पयासेमो ॥ १७५ ॥**

एवं दशविधं समये प्रायश्चित्तं ऋषिगणेन भणितम् ।
तत् कीदृशेषु दोषेषु जायते इति प्रकाशयामः ॥

**आदावणादिजोगग्गहणं उब्भामगादिगमणं वा ।**
**गणिगणवसभादीणं अपुच्छमाणेण जेण कयं ॥ १७६ ॥**

---

१ तिण्णि. ख । २ क्रमणे. ख । ३ अंता ख । अयं चूलिकाशब्दः क-पुस्तके १७३ गाथातः पूर्वं १७२ गाथातः पश्चाच्च । ४ गणी ख । ५ समासदो ख ।

आतापनादियोगग्रहणं उद्भ्रामकादिगमनं वा ।
गणिगणवृषभादीनां अपृच्छमानेन येन कृतं ॥

**पोत्थयपिच्छकमंडलुवक्कलयादि परेसिमुवयरणं ।**
**तेसिं परोक्खदो णियकज्जेणुवभोगियं जेण ॥ १७७ ॥**

पुस्तकपिच्छिकाकमंडलुवल्कलादि परेषां उपकरणं ।
तेषां परोक्षतः निजकार्येण उपभोगितं येन ॥

**गणहरवसहादीणं भणियं ण कयं पमाददोसेण[1] ।**
**सो आलोयणमित्तेण सुज्झए गुरुसयासम्हि ॥ १७८ ॥**

गणधरवृषभादीनां भणितं न कृतं प्रमाददोषेण ।
स आलोचनामात्रेण शुद्ध्यति गुरुसकाशे ॥

**जे गच्छादो संहाहिवादिकज्जेण णिग्गया मुणिणो ।**
**पंचसमिदा तिगुत्ता जिदिंदियपरीसहा वीरा[3] ॥ १७९ ॥**

ये गच्छतः संघाधिपतिकार्येण निर्गता मुनयः ।
पंचसमिताः त्रिगुप्ता जितेन्द्रियपरीषहा वीराः ॥

**पंथादिचारपमुहादिचारं संसोधया हु तद्दियहं ।**
**तेसिं पुणागयाणं आलोयणमेव संसोही ॥ १८० ॥**

पथ्यतिचारप्रमुखातिचारं संशोधका हि तद्दिवसं ।
तेषां पुनरागतानां आलोचनमेव संशुद्धिः ॥

**[4]जे वि य अण्णगणादो णियगणमज्झयणहेदुणायादा ।**
**तेसिं पि तारिसाणं आलोयणमेव संसुद्धी ॥ १८१ ॥**

---

१ पमाददो जेण. ख । प्रमादतः येन । २ घा. ख । ३ धीरा. ख । ४ इदं गाथासूत्रं पूर्वमपि ( १७० ) आगतं ।

येऽपि च अन्यगणतो निजगणे अध्ययनहेतुना आयाताः ।
तेषामपि तादृशानां आलोचना एव संशुद्धिः ॥

आलोयणं–इत्यालोचना ।

---

**मणवयणकायदुप्परिणामो अप्पाणयम्मि[1] अप्पदरो ।**
**जस्सुप्पण्णो जेण य साधम्मीए ण विहीओ विणओ ॥ १८२ ॥**

मनवचनकायदुष्परिणामः आत्मनि अल्पतरः ।
यस्योत्पन्नः येन च सधर्मके न विहितो विनयः ॥

**आयरियादिसु णियहत्थपायसंघट्टणं च जेण कयं ।**
**मिच्छा मे दुक्कडमिदि पडिक्कमणेण विसुज्झदि सो ॥१८३॥**

आचार्यादिषु निजहस्तपादसंघट्टनं च येन कृतं ।
मिथ्या मे दुष्कृतं इति प्रतिक्रमणेन विशुद्ध्यति सः ॥

**दिवसियरादियगोयरणिसीधिकागमणसंभवमलेसु ।**
**तं णियमकरणमेत्तं पडिकमणं होइ सुद्धियरं ॥ १८४ ॥**

दैवसिकरात्रिकगोचरनिषेधिकागमनसंभवमलेषु ।
तन्नियमकरणमात्रं प्रतिक्रमणं भवति शुद्धिकरं ॥

**पंचसु महव्वएसु य समिदीगुत्तीसु थोवअदिचारे ।**
**तह कोहमाणमायालोहेसु फुडं उदिण्णेसु[2] ॥ १८५ ॥**

पंचसु महाव्रतेषु च समितिगुप्तिषु स्तोकातिचारे ।
तथा क्रोधमानमायालोभेषु स्फुटं उदीर्णेषु ॥

---

१ अणयम्मि क । २ अदिण्णेसु. ख ।

**चक्खिदियादिदुप्परिणामे पेसुण्णकलहअब्भक्खाणे।**
**वेज्जाविच्चपमादे सज्झायज्झाणवाघादे ॥ १८६ ॥**

चक्षुरिन्द्रियादिदुष्परिणामे पैशून्यकलहाभ्याख्याने।
वैयावृत्यप्रमादे स्वाध्यायाध्ययनव्याघाते ॥

**गोयरगयस्स लिंगुट्ठाणे अण्णस्स संकिलेसे य।**
**णिंदणगरहणजुत्तो णियमो वि य होदि पडिकमणं ॥ १८७॥**

गोचरगतस्य लिंगोत्थाने अन्यस्य संक्लेशे च।
निन्दनगर्हणयुक्तः नियमोऽपि भवति प्रतिक्रमणं ॥

पडिकमणं—इति प्रतिक्रमणं।

---

**लोचणहछेदसुमिणिंदियादिचारेगकोसगमणेसु।**
**सुमिणणिसिभोयणे वि य णियमो आलोयणा उभयं ॥ १८८॥**

लोचनखच्छेदस्वप्नेन्द्रियातिचारैककोशगमनेषु।
स्वप्ननिशिभोजनेऽपि च नियमः आलोचना उभयं ॥

**पक्खियचाउम्मासियसंवच्छरियादिदोससुद्धियरं।**
**आलोयणापुरस्सर पडिकमणणिसामणं उभयं ॥ १८९ ॥**

पाक्षिकचातुर्मासिकसांवत्सरिकादिदोषशुद्धिकरं।
आलोचनापुरःसरं प्रतिक्रमणनिशामनं उभयं ॥

उभयं—इत्युभयं।

---

**पिंडोवधिसेज्जाओ अजाणमाणेण जदि असुद्धाओ।**
**गिहिदाओ तदो णादे ताण विवेगो परिच्चागो ॥ १९० ॥**

पिंडोपधिशय्याः अजानमानेन यदि अशुद्धाः ।
गृहीताः तदा ज्ञाते तासां विवेकः परित्यागः ॥

**सुद्धम्मि अण्णपाणे सुद्धमसुद्धं ति जणियसंदेहो ।**
**अहवा असुद्ध ति वियप्पिदे विवेगो परिच्चागो ॥ १९१ ॥**

शुद्धे अन्नपाने शुद्धं अशुद्धं इति जनितसंदेहः ।
अथवा अशुद्धमिति विकल्पिते विवेकः परित्यागः ॥

**जं उवहिं सेज्जं पडि उप्पज्जदि अप्पणो कसायग्गी ।**
**तम्मि हवे परिहरिदे पायच्छित्तं विवेगोत्ति ॥ १९२ ॥**

यमुपधिं शय्यां प्रति उत्पद्यते आत्मनः कषायाग्निः ।
तस्मिन् भवेत् परिहृते प्रायश्चित्तं विवेक इति ॥

**पच्चक्खियअण्णपाणे भायणपाणीमुहेसु संपत्ते ।**
**देसेण य सव्वेण य विकिंचमाणे वि हु विवेगो ॥ १९३ ॥**

प्रत्याख्यातान्नपाने भाजनपाणिमुखेषु सम्प्राप्ते ।
देशेन च सर्वेण च विकिंचमानेऽपि हि विवेकः ॥

विवेगो—इति विवेकः ।

---

**लोचाहियास (अ) विरहे उदरकिमिणिग्गमणे मिहिगा-**
**दंसमसगादिजंतुमहावादसण्णिपातोपचारे य ॥ १९४ ॥**

लोचाभिजातविरहे उदरक्रमिनिर्गमने मिहिका-
दंशमशकादिजन्तुमहावातसन्निपातोपचारे च ॥

---

१ लोचादहामविरहे. ख ।

**ससिणिद्धभूमिगमणे हरिदतणादीणमुवरि चंकमिदे।**
**पंकब्भंतरगमणे जाणुमिदजलप्पवेसे य॥ १९५॥**

ससिनग्धभूमिगमने हरिततृणादीनामुपरि चंक्रमिते।
पंकाभ्यन्तरगमने जानुमितजलप्रवेशे च॥

**अण्णणिमित्तपउंजिददोणीणावादिणा णदीतरणे।**
**उच्चारं पस्सवणं काऊणं उववासयागमणे॥ १९६॥**

अन्यनिमित्तप्रयुक्तद्रोणीनावादिना नदीतरणे।
उच्चारं प्रस्रवणं कृत्वा उपवासकागमने॥

**पोत्थयजिणपडिमाफोडणम्मि पंचविहथावरविघादे।**
**रत्तीए असमदेक्खिददेसे तणुमलविसग्गे य॥ १९७॥**

पुस्तकजिनप्रतिमास्फोटने पंचविधस्थावरविघाते।
रात्रौ अदृष्टदेशे तनुमलविसर्गे च॥

**एक्को काउस्सग्गो पायच्छित्तं जिणेहिं पण्णत्तं।**
**वितिचउरिंदियघादे वियतियचउरो विउस्सग्गा॥ १९८॥**

एकः कायोत्सर्गः प्रायश्चित्तं जिनैः प्रज्ञप्तं।
द्वित्रिचतुरिन्द्रियघाते द्विकत्रिकचत्वारो व्युत्सर्गाः॥

**उज्जोए पडिलिहियं दाउं संथारयं णिसि पसुत्तो।**
**उव्वत्तणपरियत्तणणिग्गमणविवज्जिदो पयदो॥ १९९॥**

उद्योते प्रतिलेखित्तं आदाय सस्तरकं निशि प्रसुप्तः।
उद्वर्तनपरिवर्तननिर्गमनविवर्जितः प्रयत्नः॥

---

१ य वासयागमणे ख। २ पाडणम्मि. ख, पातने।

**जदि संथारसमीवे पेच्छइ पंचिंदियं मुदं सूरुदये ।**
**तो तस्स हवे छेदो पंचविउस्सग्गपरिमाणो ॥ २०० ॥**

यदि संस्तरसमीपे प्रेक्षते पंचेन्द्रियं मृतं सूर्योदये ।
तर्हि तस्य भवेच्छेदः पंचव्युत्सर्गपरिमाणः ॥

**दिवसियरादियपक्खियचउमासियवरिसयादिकिरियाणं ।**
**चरिमे ऊणक्खूणणिमित्तं एगो विउस्सग्गो ॥ २०१ ॥**

दैवसिरात्रिकपाक्षिकचातुर्मासिकवार्षिकादिक्रियाणां ।
चरमे ऊनाधिक्यनिमित्तं एको व्युत्सर्गः ॥

**सिद्धंतसुणणवक्खाणावसाणे अंगपहुदिपुव्वाणं ।**
**परियट्टणावसाणे ऊणक्खूणणिमित्तं विउस्सग्गो ॥ २०२ ॥**

सिद्धान्तश्रवणव्याख्यानावसाने अंगप्रभृतिपूर्वाणां ।
परिवर्तनावसाने ऊनाधिक्यनिमित्तं व्युत्सर्गः ॥

विउसग्गो इति व्युत्सर्गः ।

---

**णिव्वियडी पुरिमंडल आयंबिलमेयठाण खमणमिदि ।**
**एसो तवोत्ति भणिओ तवोविहाणप्पहाणेहि ॥ २०३ ॥**

निर्विकृतिः पुरिमंडलं आचाम्लं एकस्थानं क्षमणमिति ।
एतत्तप इति भणितः तपोविधानप्रधानैः ॥

**पुध पुध वा मिस्सो वा उग्घाडो वा तहा अणुग्घाडो ।**
**छम्मासेहिं य परदो णत्थि तवो वीरजिणतित्थे ॥ २०४ ॥**

---

१ अंगपुव्वपहुदीणं. ख । २. ऊण इति क-पुस्तके नास्ति ।

प्रथक् पृथग्वा मिश्रं वा उद्घाटं वा तथा अनुद्घाटं ।
षण्मासैश्च परतः नास्ति तपो वीरजिनतीर्थे ॥

**उग्घाडो संतरिदो वीसमणजुदो तदण्णहा इदरो ।**
**वाहिगिलाणादीणं पढमो इदराण पुण इदरो ॥ २०५ ॥**

उद्घाटं सान्तरितं विश्रमणयुक्तं तदन्यथा इतरत् ।
व्याधिग्लानादीनां प्रथमं इतरेषां पुनः इतरत् ॥

**उव्वत्तण परियत्तण कंडूवण[1] उंटणं पसारणयं ।**
**कुव्वंतो अपमज्जिददेहो पणयारिहो होई[2] ॥ २०६ ॥**

उद्वर्तनं परिवर्तनं कंडूयनं आकुंचनं प्रसारणं ।
कुर्वन् अप्रमार्जितदेहः पंचकार्हो भवति ॥

**कुड्डं खंभं भूमिं वक्कलयादीण अप्पडिलिहित्ता ।**
**आमासइ उट्ठंघइ वइसइ तो होइ पणयं से[3] ॥ २०७ ॥**

कुड्यं स्तम्भं भूमिं वल्कलादींश्च अप्रतिलिख्य ।
आश्रयति उत्तिष्ठति वसति तर्हि भवति पंचकं तस्य ॥

**वियडिं तिण कट्ठं वा रादो व दिया व अप्पडिलिहित्ता ।**
**गेण्हंतो चालंतो पणयरिहो कप्पववहारे ॥ २०८ ॥**

वियडिं तृणं काष्ठं वा रात्रौ दिवि वा अप्रतिलिख्य ।
गृह्णन् चालयन् पंचकार्हः कल्पव्यवहारे ॥

**उच्चारं पस्सवणं कलिं च पासाणवियडियादीयं ।**
**अपमज्जिददेसम्मि विकिंचंतो होइ पणयरिहो ॥ २०९ ॥**

---

१ कंडूअणा. क । २ सोइ. क । ३ सो. ख ।

उच्चारं प्रस्रवणं कलिं च पाषाणवियाडिकादिकं ।
अप्रमार्जितदेशे विकुर्वन् भवति पंचकार्हः ॥

**कंटय कलिं च पासाणछल्लितणकट्ठखप्परादीयं ।**
**अंगुलिणहदंतेहिं छिंदंतो होइ पणयरिहो ॥ २१० ॥**

कंटकान् कलिं च पाषाणत्वक्तृणकाष्ठखर्परादिकं ।
अंगुलिनखदन्तैः छिन्दन् भवति पंचकार्हः ॥

**पायच्छित्तं दिण्णं कुव्वंतो जदा अंतरिज्ज रोगेण ।**
**तो णीरोगो संतो पणयरिहो कप्पववहारे ॥ २११ ॥**

प्रायश्चित्तं दत्तं कुर्वन् यदा अन्तरियात् रोगेण ।
तर्हि नीरोगः सन् पंचकार्हः कल्पव्यवहारे ॥

**पायच्छित्तं दिण्णं कुव्वंतो जो सदेसपरदेसे ।**
**गुरुकज्जं साधिज्जो महल्लयं तस्स आयस्स ॥ २१२ ॥[1]**

प्रायश्चित्तं दत्तं कुर्वन् यः स्वदेशपरदेशे ।
गुरुकार्यं साधयति महत् तस्य आगतस्य ॥

**पुव्वपदिण्णं पायच्छित्तं छंडाविऊण पणयं तु ।**
**दायव्वमेव गुरुणा इय भणियं कप्पववहारे ॥ २१३ ॥[1]**

पूर्वप्रदत्तं प्रायश्चित्तं त्याजयित्वा पंचकं तु ।
दातव्यमेव गुरुणा इति भणितं कल्पव्यवहारे ॥

**उप्पण्णं पि कसाए मिच्छाकारो न तक्खणे कुज्जा ।**
**पणय महोरत्तगदे तेण परं मासियं छेदो ॥ २१४ ॥**

१ इदं गाथासूत्रं ख-पुस्तके नास्ति ।

उत्पन्नेऽपि कषाये मिथ्याकारं न तत्क्षणे कुर्यात् ।
पंचकं मुहूर्तगते तेन परं मासिकं छेदः ॥

**वसहिय दुवारमूले रादो पंचेंदियो मदो दिट्ठो ।**
**जावदिया णीसरिदा पविसंता एककल्लाणं ॥ २१५ ॥**

उषित्वा द्वारमूले रात्रौ पंचेन्द्रियो मृतो दृष्टः ।
यावन्तः निःसरिताः प्रविशन्तः एककल्याणं ॥

पणयं—इति पंचकं ।

---

**णखहरणादि-छुरियादि-वासियादि-कुट्ठारियादीहिं ।**
**दंडादिहिं छिंदंतो लहुगुरुयामासचउमासा ॥ २१६ ॥**

नखहरणादि-छुरिकादि-वास्यादि-कुठारादिभिः ।
दण्डादिभिः छिन्दन् लघुगुरुमासचतुर्मासाः ॥

**मणिबंधचरणबाहुपसारणं जो करावइ परेहिं ।**
**एय दु करेदि तस्स य लहुगुरुयामासचउमासा ॥ २१७ ॥**

मणिबन्धचरणबाहुप्रसारणं यः कारयति परैः ।
एतत्तु करोति तस्य च लघुगुरुमासचतुर्मासाः ॥

**चूरेइ हत्थपत्थरमुग्गरमुसलेहिं एय दु करेहिं ।**
**जो इट्टयादिगं से लहुगुरुआमासचउमासा ॥ २१८ ॥**

चूरयति हस्तप्रस्तरमुद्गरमुसलैः एतत्तु करोति ।
यः इष्टकादिकं तस्य लघुगुरुमासचतुर्मासाः ॥

मासियं चउमासियं—इति मासिकं चतुर्मासिकं ।

---

१ इयं गाथा ख-पुस्तके नास्ति । २ तो. पुस्तके पाठः ।

**अइ वालवुड्ढदासेरगब्भिणीसंढकारुगादीणं ।**
**पव्वज्जा दिंतस्स हु छग्गुरुमासा हवदि छेदो ॥ २१९ ॥**

अतिवालवृद्धदासेरगर्भिणीषंढकार्वादीनां ।
प्रव्रज्यां ददतः हि षड्गुरुमासा भवति च्छेदः ॥

**विंति परे एदेसु व कारुग णिग्गंथदिक्खणे गुरुणो ।**
**गुरुमासो दायव्वो तस्स य णिग्घाडणं तह य ॥ २२० ॥**

ब्रुवन्ति परे एतेषु च कारुषु निर्ग्रन्थदीक्षादायिने गुरवे ।
गुरुमासो दातव्यः तस्य च निर्घाटनं तथा च ॥

**णावियकुलालतेलियसालियकल्लाललोहयाराणं ।**
**मालारप्पहुदीणं तवदाणे विण्णि गुरुमासा ॥ २२१ ॥**

नापितकुलालतैलिकशालिककलवारलोहकाराणां ।
मालाकारप्रभृतीनां तपोदाने द्वौ गुरुमासौ ॥

**चम्मारवरुडछिंपियखत्तियरजगादिगाण चत्तारि ।**
**कोसट्टयपारद्धियपासियसावणियकोलयादिसु अट्ठं ॥ २२२ ॥**

चर्मकारवरुटछिंपकतक्षकरजकादिकानां चत्वारः ।
कोशारुकपारधिकपार्श्विकश्रावणिककोलिकादिषु अष्टौ ॥

**चंडालादिसु सोलस गुरुमासा वाहडोंववाउरिया-**
**प्पहुदीणं वत्तीसं गुरुमासा होंति तवदाणे ॥ २२३ ॥**

चंडालादिषु षोडशगुरुमासा व्याधडोम्बवागुरिक-
प्रभृतीनां द्वात्रिंशद्गुरुमासा भवन्ति तपोदाने ॥

**चउसट्ठी गुरुमासा गोक्खयमायंगखट्टिकादीणं ।**
**णिग्गंथदिक्खदाणे पायच्छित्तं समुद्दिट्ठं ॥ २२४ ॥**

चतुषष्ठिः गुरुमासाः गोक्षयमातंगखटिकादीनां ।
निर्ग्रन्थदीक्षादाने प्रायश्चित्तं समुद्दिष्टं ॥

**कप्पव्ववहारे पुण छम्मासेहिं परं तु णत्थि तवो ।**
**इह वड्डमाणतित्थे तेण य छम्मासियं दिण्णं ॥ २२५ ॥**

कल्पव्यवहारे पुनः षण्मासैः परं तु नास्ति तपः ।
इह वर्धमानतीर्थे तेन च षण्मासिकं दत्तं ॥

छम्मासियं–इति षाण्मासिकं ।

---

**अण्णं वि य मूलुत्तरगुणादिचारेसु पुव्वमवि य तवो ।**
**वुत्तो जहारिहमिदो पुरिसे अधिकिच्चं[1] पुण भणिमो ॥ २२६ ॥**

अन्यदपि च मूलोत्तरगुणातिचारेषु पूर्वमपि च तपः ।
उक्तं यथार्हं इतः पुरुषान् अधिकृत्य पुनः भणामः ॥

**आगाढाधंच्चपयत्तचारिअणुविचिणो सपडिवक्खा[2][3] ।**
**अट्ठ णरा होंति पुणो सोलसधा अक्खसंचारे[4] ॥ २२७ ॥**

आगाढ·········प्रयत्नचार्यनुवीचीकाः सप्रतिपक्षाः ।
अष्टौ नरा भवन्ति पुनः षोडशधा अक्षसंचारे ॥

---

१ अविकिच्छमिह भणिमो. क । २ वच्च. ख । ३ यणुवीचीणो. ख । ४ अस्माद्ग्रे ख–पुस्तके इदं गाथासूत्रं उपलभ्यते।

पढमक्खे अंतगदे आदिगदे संकमे ( दि ) विदियक्खो ।
विण्णि वि गंतूणंतं आदिगदे संकमेदि ( तदि ) यक्खो ॥
प्रथमाक्षे अन्तगते आद्यागते संक्रामति द्वितीयाक्षः ।
द्वावपि गत्वान्तं आद्यागते संक्रामति तृतीयाक्षः ॥
गाथेयं गोम्मटसारेऽपि वर्तते प्रमादसंख्यागणनावसरे ।

**णिव्वियडिआदिया जे पुव्वुत्ता पंचएक्कतीसंते ।**
**अक्खाणं संचारेणं[1] होंति ते इह विहं जोगे[2] ॥ २२८ ॥**

निर्विकृत्यादिका ये पूर्वोक्ताः पंचैकात्रिंशदन्ताः ।
अक्षाणां संचारेण भवन्ति ते इह विधं योगे ॥

**पढमो सुद्धो सोलससु सेसपण्णारसा णरा कमसो ।**
**पण्णारसतवसलागा पढमादीया अणुचरंति ॥ २२९ ॥**

प्रथमः शुद्धः षोडशेषु शेषपंचदश नराः क्रमशः ।
पंचदशतपःशलाकाः प्रथमादिका अनुचरन्ति ॥

**अवसेसतवसलागा सोलस पुवुत्तअट्ठपुरिसा वि ।**
**दो दो चरंति एवं दक्खिणमग्गो समुद्दिट्ठो ॥ २३० ॥**

अवशेषतपःशलाकाः षोडशाः पूर्वोक्ताष्टपुरुषा अपि ।
द्वे द्वे चरन्ति एवं दक्षिणमार्गो समुद्दिष्टः ॥

**उत्तरमग्गेण पढमो एयं सेसा चरंति दो दो य ।**
**अट्ठण्हं आइल्लो तिण्णि य चत्तारि अवसेसा ॥ २३१ ॥**

उत्तरमार्गेण प्रथमः एकां शेषाः चरन्ति द्वे द्वे च ।
अष्टानां आदिमः तिस्रः च चतस्रः अवशेषाः ॥

**अहवा पढमे पक्खे दसेसु दो दो य तिण्णि सोलसमे ।**
**मिस्ससलागा देया ताण ट्ठाणं सुणह कमेण ॥ २३२ ॥**

अथवा प्रथमे पक्षे दशसु द्वे द्वे च तिस्रः षोडशे ।
मिश्रशलाका देयाः तासां स्थानं शृणुत क्रमेण ॥

---

[1] संचारे. ख–ग । [2] विभजेगो. ख–ग ।

**णवमी छव्वीसदिमा पढम दुइज्जा य पण्णरस तीसा ।**
**छट्ठी तेरसमी वि य चोद्दसी सत्तवीसदिमा ॥ २३३ ॥**

नवमी षड्विंशतितमी प्रथमा द्वितीया च पंचदशी त्रिंशत्तमी ।
षष्ठी त्रयोदशमी अपि च चतुर्दशमी सप्तविंशतितमी ॥

**सोलस बावीसदिमा बारस अडवीसिमा तिय चउत्थी ।**
**चउवीसिमा पणवीसा अट्ठमि एयारसी चेव ॥ २३४ ॥**

षोडशी द्वाविंशतितमी द्वादशमी अष्टाविंशतितमी तृतीया ।
चतुर्थी, चतुर्विंशतितमी पंचविंशतितमी अष्टमी एकादशमी ॥

**अट्ठारस वीसदिमा सत्तम दसमी य एक्कवीसदिमा ।**
**तेवीसदिमा सत्तारसी य एऊणवीसदिमा ॥ २३५ ॥**

अष्टादशमी विंशतितमी सप्तमी दशमी च एकविंशतितमी ।
त्रयोविंशतितमी सप्तदशमी च एकोनविंशतितमी ॥

**पंचम उगुतीसदिमा इगितीसदिमा य होंति सोलसमे ।**
**मिस्ससलागा गेण्हह इगिदुतिचउपंचसंजोगे ॥ २३६ ॥**

पंचमी एकोनत्रिंशत्तमी एकत्रिंशत्तमी च भवंति षोडशे ।
मिश्रशलाकाः ग्रहाण एकद्वित्रिचतुःपंचसंयोगे ॥

**अट्ठण्हं आदिण्णे मिस्ससलागाउ तिण्णि दायव्वा ।**
**सेसाणं चत्तारि य पुध पुध ताणं सुणसु ठाणं ॥ २३७ ॥**

अष्टानां आदिमे मिश्रशलाकाः तिस्रो दातव्याः ।
शेषानां चतस्रः च पृथक् पृथक् तेषां शृणुत स्थानं ॥

**पढम दुइज्ज तइज्जा चउ पंचमिया य छट्ठ तेरसमी ।**
**सत्तम अट्ठम चोद्दसमी वि य पण्णारसी चेव ॥ २३८ ॥**

प्रथमा द्वितीया तृतीया चतुर्थी पंचमी षष्ठी त्रयोदशमी ।
सप्तमी अष्टमी चतुर्दशमी अपि च पंचदशमी एव ॥

**णवदसएक्कारसमी य बारसमी तह य चेव सोलसमी ।**
**अट्ठारसमी वावीसिमा य पुणु वीसिमा चेव ॥ २३९ ॥**

नवदशैकादशमी च द्वादशमी तथा चैव षोडशी ।
अष्टादशमी द्वाविंशतितमी च पुनः विंशतितमी एव ॥

**सत्तारसमी एगूणवीसिमा य चउवीसा ।**
**इगिवीसदिमा तेवीसिमा य छव्वीसतीसदिमा ॥ २४० ॥**

सप्तदशी एकोनविंशतितमी च चतुर्विंशतितमी ।
एकविंशतितमी त्रयोविंशतितमी च षड्विंशतित्रिंशत्तम्यौ ॥

**सत्तावीसदिमा वि य अट्ठावीसा य ऊणतीसदिमा ।**
**इगतीसदिमा य इमा मिस्ससलायाउ अट्ठण्हं ॥ २४१ ॥**

सप्तविंशतितमी अपि च अष्टाविंशतितमी चैकोनत्रिंशत्तमी ।
एकत्रिंशत्तमी च इमा मिश्रशलाका अष्टानां ॥

**अप्पप्पणोसलागापडिबद्धतवं करिंतु एयट्ठं ।**
**सव्वत्थ वि तवसंखा दायव्वा बुद्धिमंतेण ॥ २४२ ॥**

स्वस्वशलाकाप्रतिबद्धतपः कर्तुः एकार्थम् ।
सर्वत्रापि तपःसंख्या दातव्या बुद्धिमता ॥

तवो–इति तपः ।

---

**तवभूमिमदिक्कंतो मूलट्ठाणं च जो ण संपत्तो ।**
**से परियायच्छेदो पायच्छित्तं समुद्दिट्ठं ॥ २४३ ॥**

तपोभूमिमतिक्रामन् मूलस्थानं च यः न संप्राप्तः ।
तस्य पर्यायच्छेदः प्रायश्चित्तं समुद्दिष्टं ॥

**णियगच्छादो णिग्गय एगागी विहरिऊण पुण आणं ।**
**जेत्ति[1]यकालपमाणा पव्वज्जा छिज्जए तस्स ॥ २४४ ॥**

निजगच्छतो निर्गत्य एकाकी विहृत्य पुनः आगमनं ।
यावत्कालप्रमाणा प्रव्रज्या छिद्यते तस्य ॥

**पुव्वं जहुत्तचारी पच्छा पासत्थभावमुववण्णो ।**
**जेत्तियंकालं विहरदि मुक्कधु[2]रो सो समण्णं[3] पुणो ॥ २४५ ॥**

पूर्वं यथोक्तचारी पश्चात् पार्श्वस्थभावमुपपन्नः ।
यावत्कालं विहरति मुक्तधुरः स श्रमणः पुनः ॥

**तेत्तियकालपमाणा पव्वज्जा तस्स छिज्जदि जदिस्स ।**
**पासत्थभावमुक्कुस्सुववण्णसुणिम्मलचरित्तं ॥ २४६ ॥**

तावत्कालप्रमाणा प्रव्रज्या तस्य छिद्यते यतेः ।
पार्श्वस्थभावमुक्तस्य उत्पन्नसुनिर्मलचरित्रस्य ॥

**तस्सिस्साणं सोही सगणत्था[4]इरियणामगहणेण ।**
**लोचं काऊण तदो पडिकमणं कुणउ ण हु अण्णं ॥ २४७ ॥**

तस्य शिष्यानां शुद्धिः स्वगणस्थाचार्यनामग्रहणेन ।
लोचं कृत्वा तदा प्रतिक्रमणं करोतु न हि अन्यत् ॥

**पासत्थादीहिं समं आचरंतो सगिप्पमादेण ।**
**छम्मासब्भंतरदो जदि तद्दोसे णिसेवदि सो ॥ २४८ ॥**

---

१ तक्काल. ख–ग । २ धरो. ख–ग । ३ समणपोल्लो ख–ग । ४ चा. क ।

पार्श्वस्थादिभिः समं आचरन् स्वकप्रमादेन ।
षण्मासाभ्यन्तरतो यदि तद्दोषान् निषेवते सः ॥

**तो से तवसा सुद्धी छम्मासेहिं परं तु कायव्वा ।**
**तं पव्वज्जाछेदो गुरुमूलमुवागयस्स पुणो ॥ २४९ ॥**

तर्हि तस्य तपसा शुद्धिः षण्मासैः परं तु कर्तव्या ।
तत्प्रव्रज्याछेदो गुरुमूलमुपागतस्य पुनः ॥

**कलहं काऊण खमावणमकाऊण एगदिविस रिसी ।**
**जदि वसदि णियगणे तस्स पंचदिवासियतवछेदो ॥ २५० ॥**

कलहं कृत्वा क्षमापनं अकृत्वा एकदिवसं ऋषिः ।
यदि वसति निजगणे तस्य पंचदैवसिकतपश्छेदः ॥

**पलायरियस्स दिणाण दस आयरियस्स पण्णरसदिवसा ।**
**छिज्जंति परगणगयस्स पुण दसपण्णरसवीसदिणा ॥ २५१ ॥**

एलाचार्यस्य दिनानां दशाचार्यस्य पंचदशदिवसानि ।
छिद्यन्ते परगणगतस्य पुनः दशपंचदशविंशतिदिनानि ॥

**एवं जेत्तियदिवसा अखमाविंतो सगण परगणे वा ।**
**अत्थंति ततो तेत्तियदिवसगुणो ताण तवछेदो ॥ २५२ ॥**

एवं यावद्दिवसानि अक्षमापयन् स्वगणे परगणे वा ।
तिष्ठन्ति ततः तावद्दिवसगुणः तेषां तपश्छेदः ॥

छेदो—इति च्छेदः ।

---

**जो अपरिमिदपराधो तवछेदेण विणा सुद्धिमुवयादि ।**
**संभोगकरणजोगो मूलखिदी दिज्जदे तस्स ॥ २५३ ॥**

योऽपरिमितपराधः तपश्छेदेन विना शुद्धिमुपयाति ।
संभोगकरणयोग्यः मूलक्षितिः दीयते तस्य ॥

**पंचमहव्वदभट्ठो छावासयवज्जिदो णिरणुतावी ।**
**उस्सुत्तकारउ तह सच्छंदो मूलखिदिमेदि ॥ २५४ ॥**

पंचमहाव्रतभ्रष्टः षडावश्यकवर्जितः निरनुतापी ।
उत्सूत्रकारकः तथा स्वच्छंदः मूलक्षितिमेति ॥

**पासत्थादी चउरो तप्पासे जे परे च पव्वइदा ।**
**ते सव्वे वि य मूलट्ठाणं पावंति हु णियत्ता ॥ २५५ ॥**

पार्श्वस्थादयश्चत्वारः तत्पार्श्वे ये परे च प्रव्रजिताः ।
ते सर्वेऽपि च मूलस्थानं प्राप्नुवन्ति हि निवृत्ताः ॥

**तस्सिस्साणं सुद्धी सगणत्थायरियणामगहणेण ।**
**लोचं काऊण तदो पडिकमणं कुणह ण हु अण्णं ॥ २५६ ॥**

तच्छिष्यानां शुद्धिः स्वगणस्थाचार्यनामग्रहणेन ।
लोचं कृत्वा ततः प्रतिक्रमणं करोतु न हि अन्यत् ॥

**संघाहिवस्स मूलं पत्तस्स वि दिज्जदे ण मूलखिदी ।**
**उड्डाहपसमणत्थं बहुजणमाधारदाएया ॥ २५७ ॥**

संघाधिपतेः मूलं प्राप्तस्य अपि न दीयते मूलक्षितिः ।
उद्दाहप्रशमनार्थं बहुजनमाधारदायकाः ॥

**जदि आयरिओ छेदं च मूलभूमिं च पत्तओ मरणं ।**
**तो तस्स जहाजोग्गं छेदो मूलं च दायव्वं ॥ २५८ ॥**

---

१ इदं गाथासूत्रं ख–ग पुस्तके नास्ति । पूर्वमप्यागतं ५२ पृष्ठे ।

यदि आचार्यः छेदं मूलभूमिं च प्राप्तः मरणं ।
तर्हि तस्य यथायोग्यं छेदः मूलं च दातव्यं ॥

**कालम्मि असंपहुत्ते पत्तो छेदं च मूलभूमिं च**
**जदि आयरिओ तो से तवसुद्धी चेव दायव्वा ॥ २५९ ॥**

कालेऽसंप्राप्ते प्राप्तः छेदं च मूलभूमिं च ।
यदि आचार्यः तर्हि तस्य तपःशुद्धिः चैव दातव्या ॥

**दिज्जदि तवो वि संठाणादीछम्मासखमणपेरंतो ।**
**अवि सत्तमासपेरंतो वा अण्णं ण दायव्वं ॥ २६० ॥**

दीयते तपोऽपि संस्थानादिषण्मासक्षमणपर्यन्तं ।
अपि सप्तमासपर्यन्तं वा अन्यन्न दातव्यं ॥

**आयरियस्स दु मूलं दिंतो सयमेव मूलभूमी सा**
**पावदि उड्डाहकरो धम्मस्स जसोवहकरो सा ॥**

आचार्यस्य तु मूलं ददन् स्वयमेव मूलभूमिं स ।
प्राप्नोति उद्दाहकरः धर्मस्य यशोवधकरः सः

मूलं–इति मूलम् ।

---

**मूलखिदी बोलीणो सहसंभोगस्स जो य जोगो दु ।**
**सो पावदि परिहारं पायच्छित्तं ति विंति जिणा ॥ २६२ ॥**

मूलक्षितिं त्यक्त्वा सहसंभोगस्य यश्च (अ) योग्यस्तु ।
स प्राप्नोति परिहारं प्रायश्चित्तं इति ब्रुवन्ति जिनाः ॥

**तं पि अ अणुपट्ठावणपारंचिगभेददो हवे दुविहं ।**
**सगणपरगणविभेदेणिह अणुपट्ठावणं दुविहं ॥ २६३ ॥**

तदपि च अनुपस्थापनपारंचिकभेदतः भवेद्द्विविधं ।
स्वगणपरगणविभेदेनेह अनुपस्थापनं द्विविधं ॥

**अण्णरिसीणं च दु रिसिं गिहत्थं च अण्णतित्थिं वा ।**
**इत्थिं वा तेणिंतो मुणिणो पहणंतओ वि तहा ॥ २६४ ॥**

अन्यर्षीणां च तु ऋषिं गृहस्थं च अन्यतीर्थ्यं वा ।
स्त्रीं वा स्तेनयन् मुनीन् प्रहरन्नपि तथा ॥

**अण्णे वि एवमादी दोसे सेवंतओ पमादेण ।**
**पावइ अणुपट्ठवणं णियगणपडिबद्धयं साहू ॥ २६५ ॥**

अन्यानपि एवमादिकान् दोषान् सेवमानः प्रमादेन ।
प्राप्नोति अनुपस्थापनं निजगणप्रतिबद्धकं साधुः ॥

**तत्थ रिसिसमुदायट्ठिदपरिसुत्तादो बहिम्मि बत्तीसं ।**
**दंडेसु वसदि पिच्छं परंमुहं कुंडियासहियं ॥ २६६ ॥**

तत्र ऋषिसमुदायस्थितपरिषत्तः बहिः द्वात्रिंशति ।
दंडेषु वसति पिच्छं पराङ्मुखं कुंडिकासहितं ॥

**पुरिदो धारिदऽचेलयपहुदीणं वंदणं करेदि सयं ।**
**ते पुण वंदंति ण तं गुरूणमालोचए एक्को ॥ २६७ ॥**

पुरतः धृताचेलकप्रभृतीनां वन्दनां करोति स्वयं ।
ते पुनः वन्दन्ते न तं गुरुं आलोचयेदेकम् ॥

**बारसवरिसाणेवं मोणवदी पंच पंच उववासे ।**
**काऊण य पारिंतो गमइ जहण्णेण सो साहू ॥ २६८ ॥**

१ ऋष्याश्रमादित्यर्थः ।

द्वादशवर्षान् एवं मौनव्रती पंच पंच उपवासान् ।
कृत्वा च पारयन् गमयति जघन्येन स साधुः ॥

**उक्कसेणं छम्मासे उववासिऊण पारिंतो ।**
**गमइ वरिसाणि बारिस अणुपट्ठवगो गणणिबद्धो ॥ २६९ ॥**

उत्कृष्टेन षण्मासान् उपोष्य पारयन् ।
गमयति वर्षाणि द्वादश अनुपस्थापको गणनिबद्धः ॥

सगणो—इति स्वगणानुपस्थानम् ।

---

**परगणअणुपट्ठवगो वि एरिसो चेव किं तु जम्मि गणे ।**
**उप्पण्णा ते दोसा दप्पादीएहिं पुव्वुत्ता ॥ २७० ॥**

परगणानुपस्थापकोऽपि एतादृशश्चैव किन्तु यस्मिन् गणे ।
उत्पन्ना ते दोषा दर्पादिकैः पूर्वोक्ताः ।

**तेणायरिएण य सो परगणमणुपट्ठविज्जदे साहू ।**
**तत्थतणाइरियंते आलोचदि सो तदो दोसे ॥ २७१ ॥**

तेनाचार्येण च स परगणं अनुपस्थाप्यते साधुः ।
तत्रत्याचार्यान्ते आलोचयति स ततः दोषान् ॥

**आलोयणं सुणित्ता पायच्छित्तं ण दिंतएण पुणो ।**
**तेण वि आयरिएणं अण्णत्थणुपट्ठविज्जदि जदि सो ॥ २७२ ॥**

आलोचनं श्रुत्वा प्रायश्चित्तं न ददता पुनः ।
तेनापि आचार्येण अन्यत्र अनुस्थाप्यते यतिः सः ॥

**तेण वि अण्णत्थेवं तिण्णि य चत्तारिपंचछस्सत्ता ।**
**आयरियाण समीवे अणुपट्ठाविज्जदे कमसो ॥ २७३ ॥**

तेनापि अन्यत्रैवं त्रिचतुःपंचषट्सप्तानां ।
आचार्याणां समीपे अनुपस्थाप्यते क्रमशः ॥

**पच्छिमगणिणा वि पुणो पुव्वुत्तालोचिदायरियपासं ।**
**अणुपट्ठविदो संतो णियंत्तिदूणेदि तप्पासं ॥ २७४ ॥**

पश्चिमगणिनापि पुनः पूर्वोक्तालोचिताचार्यपार्श्वे ।
अनुपस्थापितः सन् निवृत्यैति तत्पार्श्वं ॥

**सो वि जहण्णं मज्झिममुक्कस्सं वा पुरोदिदं छेदं ।**
**दाउं तस्सायरिओ चरावए पुव्वविधिणेव ॥ २७५ ॥**

सोऽपि जघन्यं मध्यमं उत्कृष्टं वा पुरोदितं छेदं ।
दत्वा तस्मै आचार्यः चारयति पूर्वविधिनैव ॥

परगण–इति परगणानुपस्थानम् ।

---

**तित्थयरगणधराणं आयरियाणं महड्ढिपत्ताणं ।**
**संघस्स पवयणस्स य आसादणकारओ पावो ॥ २७६ ॥**

तीर्थकरगणधराणां आचार्याणां महर्द्धिप्राप्तानां ।
संघस्य प्रवचनस्य च आसादनाकारकः पापः ॥

**रायापराधकारी रायामच्चाण तह य वंदंतो ।**
**रायग्गमहिसिपडिसेवगो य धम्मद्दुहो तह य ॥ २७७ ॥**

राजापराधकारी राजामात्यान् तथा च वन्दमानः ।
राजाग्रमहिषीप्रतिसेवकश्च धर्मध्रुक् तथा च ॥

**जो एवंविहदोसो चाउव्वण्णस्स सवणसंघस्स ।**
**मज्झम्मि पंचतालं दाऊणं सो संघहबाहिरओ ॥ २७८ ॥**

य एवंविधदोषः चातुर्वर्ण्यस्य श्रमणसंघस्य ।
मध्ये पंचतालं दत्वा स संघबाह्यः ॥

**एसो अवंदणिज्जो पंचमहापादगोत्ति घोसित्ता ।**
**पायच्छित्तं दाउं सदेसदो धाडिदो संतो ॥ २७९ ॥**

एषः अवन्दनीयः पंचमहापातकीति घोषयित्वा ।
प्रायश्चित्तं दत्वा स्वदेशतो घाटितः सन् ॥

**गंतूण अण्णदेसे जत्थ य धम्मं ण याणए लोओ ।**
**तत्थत्थिऊण पायच्छित्तं आचरउ गणिदिण्णं ॥ २८० ॥**

गत्वा अन्यदेशे यत्र च धर्मं न जानाति लोकः ।
तत्र स्थित्वा प्रायश्चित्तं आचरतु गणिदत्तम् ॥

**तं पुण सपरगणट्ठियअणुपट्ठवगस्स जारिसं दिण्णं ।**
**तारिसमेवेदस्स वि जहण्णमुक्कस्समिदरं वा ॥ २८१ ॥**

तत्पुनः स्वपरगणस्थितानुपस्थापकस्य यादृशं दत्तं ।
तादृशमेवैतस्यापि जघन्यं उत्कृष्टं इतरद्वा ॥

**पारं अंचदि परदेसमेदि गच्छदि जदो तदो एसो ।**
**पारंचिगोत्ति भण्णदि पायच्छितं जिणमदम्मि ॥ २८२ ॥**

पारं अंचति परदेशमेति गच्छति यतस्ततः एषः ।
पारञ्चिक इति भण्यते प्रायश्चितं जिनमते ॥

**एदं पायच्छित्तं कप्पव्ववहारभासियं भणियं ।**
**जीदे विस एव विधी णवरि सतवोमासिगादिच्छगुरुमासा २८३**

एवं प्रायश्चित्तं कल्पव्यवहारभाषितं भणितं ।
जीते अपि स एव विधिः नवरि सतपःमासिकादिषड्गुरुमासाः ॥

**आदिंतिगसंघदणो भवभीरू जिदपरीसहो धीरो ।**
**गीदत्थो दढधम्मो चरेदि पारंचिगं भिक्खू ॥ २८४ ॥**

आदिमत्रिसंहननः भवभीरुः जितपरीषहः धीरः ।
गीतार्थः दृढधर्मा चरति पाराञ्चिकं भिक्षुः ॥

पारंचिगं-इति पारंचिकं ।

---

**परिणामपच्चएणं सम्मत्तं उज्झिऊण मिच्छत्तं ।**
**पडिवज्जिऊण पुणरवि परिणामवसेण सो जीवो ॥ २८५ ॥**

परिणामप्रत्ययेन सम्यक्त्वं उज्झित्वा मिथ्यात्वं ।
प्रतिपद्य पुनरपि परिणामवशेन स जीवः

**णिंदणगरहणजुत्तो णियत्तिऊणो पडिविज्ज सम्मत्तं ।**
**जं तं पायच्छित्तं सद्दहणासण्णिदं होदि ॥ २८६ ॥**

निन्दनगर्हणयुक्तः निवर्त्य पतिपद्यते सम्यक्त्वं ।
यत्तत्प्रायश्चित्तं श्रद्धानसंज्ञितं भवति ॥

**जदि पुण विराहिऊणं धम्मं मिच्छत्तमुवगमो होदि ।**
**तो तस्स मूलभूमी दायव्वा लोयविदिदस्स ॥ २८७ ॥**

यदि पुनः विराध्य धर्मं मिथ्यात्वमुपगमो भवति ।
तर्हि तस्य मूलभूमिः दातव्या लोकविदितस्य ॥

सद्दहणा-इति श्रद्धानम् ।

---

**एवं दसविधपायच्छित्तं भणियं तु कप्पववहारे ।**
**जीदम्मि पुरिसभेदं णाउं दायव्वमिदि भणियं ॥ २८८ ॥**

एवं दशविधप्रायश्चित्तं भणितं तु कल्पव्यवहारे ।
जीते पुरुषभेदं ज्ञात्वा दातव्यमिति भणितं ॥

रिसिपायच्छित्तं–इति ऋषिप्रायश्चित्तं समाप्तम् ।

---

**जं समणाणं वुत्तं पायच्छित्तं तह ज्जमाचरणं**
**तेसिं चेव पउत्तं तं समणीणंपि णायव्वं ॥ २८९ ॥**

यत् श्रमणानामुक्तं प्रायश्चित्तं तथा यत् आचरणम् ।
तेषां चैव प्रोक्तं तत् श्रमणीनामपि ज्ञातव्यम् ॥

**णंवरि परियायछेदो मूलट्ठाणं तहेव परिहारो ।**
**दिणपडिमा वि य तीसं तियालजोगो य णेवत्थि ॥ २९० ॥**

नवरि पर्यायच्छेदो मूलस्थानं तथैव परिहारः ।
दिनप्रतिमापि च तासां त्रिकालयोगश्च नैवास्ति ॥

**थिरअथिराणज्जाणं पमाददप्पेहिं एगबहुवारं ।**
**सामाचारदिचारे पायच्छित्तं इमं भणियं ॥ २९१ ॥**

स्थिरास्थिराणामार्याणां प्रमाददर्पाभ्यां एकबहुवारम् ।
सामाचारातिचारे प्रायश्चित्तं इदं भणितम् ॥

**काउस्सग्गो खमणं खमणं पणगं च पणग छट्ठं च ।**
**छट्ठं तहेव मासिगमेवमिसीणं पि दायव्वं ॥ २९२ ॥**

कार्योत्सर्गः क्षमणं क्षमणं पंचकं च पंचकं षष्ठं च ।
षष्ठं तथैव मासिकमेवं ऋषीणामपि दातव्यम् ॥

**एकस्स वत्थजुयलस्सेक्कस्स गोणिया एक्ककंथाए ।**
**पासुगजलेण पक्खालणम्मि एक्को विउस्सग्गो ॥ २९३ ॥**

एकस्य वस्त्रयुगलस्य एकस्या गौणिकायाः एककंथायाः ।
प्रासुकजलेन प्रक्षालने एको व्युत्सर्गः ॥

**अप्पासुगजलपक्खालणम्मि एगो हवेइ उववासो[1] ।**
**पत्तादीणं पक्खालणे वि णादूण दायव्वं ॥ २९४ ॥**

अप्रासुकजलप्रक्षालने एको भवति उपवासः ।
पात्रादीनां प्रक्षालनेऽपि ज्ञात्वा दातव्यम् ॥

**पहरेणेक्केणखया सिंपिंजंती जलेण पहरेणं ।**
**अवरेगेणंतिम्मे इमट्टिया जा जिणायदणे ॥ २९५ ॥**

.................................................. ।
.................................................. ॥

**लावाविज्जइ जइ सा कुड्डादीएसु इट्टयाणं वा ।**
**वेण्णिसहस्सा तो से छट्ठाइं वेण्णि पडिकमणं ॥ २९६ ॥**

लागयति यदि सा कुड्यादिकेषु इष्टकान् वा ।
द्विसहस्राणि षष्ठानि द्वे प्रतिक्रमणे ॥

**एवं मट्टियजलपरिमाणं णादूण थोवमिदरं वा ।**
**अण्णत्थ वि दायव्वं पायच्छित्तं जहाजोग्गं ॥ २९७ ॥**

एवं मृत्तिकाजलपरिमाणं ज्ञात्वा स्तोकं इतरद्वा ।
अन्यत्रापि दातव्यं प्रायश्चित्तं यथायोग्यम् ॥

**पुप्फवदी जदि विरदी जायदि तो कुणउ तिण्णि दिवसाणि ।**
**आयंबिलणिव्वियडीखमणाणं एक्कदरगं तु ॥ २९८ ॥**

---

१ खमणं च एग ठाणं वा पाठान्तरं ख–ग–पुस्तके ।

पुष्ववती यदि विरती जायते ततः करोतु त्रीणि दिवसानि ।
आचाम्लनिर्विकृतीक्षमणानां एकतरकं तु ॥

**सज्झायदेववंदणणियमादियाओ सव्वकिरियाओ ।**
**मोणेण कुणउ तिण्णि वि दिणाणि तो तुरियदिवसम्मि ॥२९९॥**

स्वाध्यायदेववंदननियमादिकाः सर्वक्रियाः ।
मौनेन करोतु त्रीण्यपि दिनानि ततः तुरीयदिवसे ॥

**पच्छण्णए पएसे पासुगसलिलेण एगकलसेण ।**
**पक्खालिदूण गत्तं गुरुमूले गिण्हदु वदाइं ॥ ३०० ॥**

प्रच्छन्ने प्रदेशे प्राशुकसलिलेन एककलशेन ।
प्रक्षाल्य गात्रं गुरुमूले गृह्णातु व्रतानि ॥

**जदि पुण चंडालादी छिविज्ज विरदी कहिं पि विरदो वा ।**
**तो जलण्हाणं किच्चा उववासं तद्दिणे कुणउ ॥ ३०१ ॥**

यदि पुनः चांडालादीन् स्पृशेत् विरती कथमपि विरतो वा ।
तर्हि जलस्नानं कृत्वा उपवासं तद्दिने करोतु ॥

**जलवदमंतेहि हवे ण्हाणं तिविहं तु तत्थ जलण्हाणं ।**
**गिहिणो विरदाणं पुण वदमंतेहिं पुणो कहियं ॥ ३०२ ॥**

जलव्रतमंत्रैः भवेत् स्नानं त्रिविधं तु तत्र जलस्नानम् ।
गृहिणो विरतानां पुनः व्रतमंत्राभ्यां पुनः कथितम् ॥

समेणीणं सम्मत्तं–इति श्रमणीनां समाप्तम् ।

---

१ अज्जाण पायच्छित्तं ख-ग–पुस्तके-।

**दोण्हं तिण्हं छण्हं मुवरिमुक्कस्समज्झिमिदिराणं ।**
**देसजदीणं छेदो विरदाणं अद्धद्धपरिमाणं ॥ ३०३ ॥**

द्वयोः त्रयाणां षण्णां उपरि उत्कृष्टयोः मध्यमानामितरेषां ।
देशयतीनां छेदः विरतानां अर्धार्धपरिमाणः ॥

**विरदाणमुत्तमलहरणस्स दुभागो तइज्जओ भागो ।**
**भागो चउत्थओ वि य तेसिं छेदो त्ति वेंति परे ॥ ३०४ ॥**

विरतानामुक्तमलहरणस्य द्विभागः तृतीयो भागः ।
भागश्चतुर्थोऽपि च तेषां छेदः इति ब्रुवन्ति परे ॥

**संजदपायच्छित्तस्सद्धादिकमेण देसविरदाणं ।**
**पायच्छित्तं होदित्ति जदि वि सामण्णदो वुत्तं ॥ ३०५ ॥**

संयतप्रायश्चित्तस्य अर्धादिक्रमेण देशविरतानां ।
प्रायश्चित्तं भवतीति यद्यपि सामान्यतः उक्तं ॥

**तो वि महापातकदोससंभवे छण्हमवि जहण्णाणं ।**
**देसविरदाणमण्णं मलहरणं अत्थि जिणभणिदं ॥ ३०६ ॥**

तथापि महापातकदोषसंभवे षण्णामपि जघन्यानां ।
देशविरतानां अन्यन्मलहरणमस्ति जिनभणितं ॥

**छट्ठ अणुव्वयघादे गुणवयसिक्खावयं तु उववासो ।**
**दंसणचारदिचारे जिणपूजं होदि णिद्दिट्ठं ॥ ३०७ ॥**

षष्ठमणुव्रतघाते गुणव्रतशिक्षाव्रतस्य तु उपवासः ।
दर्शनाचारातिचारे जिनपूजा भवति निर्दिष्टा ॥

१ गाथेयं ख–ग–पुस्तके नास्ति ।

**गोइत्थिवालमाणुसबंभणपरलिंगिआदसम्माणं ।**
**सजहण्णमज्झिमेदरदेसविरदाण मलहरणं ॥ ३०८ ॥**

गोस्त्रीबालमानुषब्राह्मणपरलिंग्यात्मसमानां ।
सजघन्यमध्यमेतरदेशविरतानां मलहरणं ॥

**पण सत णवय बारस पण्णारस अट्ठारस वावीसा ।**
**छव्वीस तीस पणइ होंति कमे गोवालपमुहेहिं विंति परे॥३०९॥**

पंच सप्त नव द्वादश पंचदश अष्टादश द्वाविंशतिः ।
षड्विंशत्रिंशत्पंचत्रिंशत् भवन्ति क्रमेण गोबालप्रमुखैः ब्रुवन्ति परे॥

**घादे एक्कावीसं उववासा दुगुणदुगुणकमसहिया ।**
**अंतादिछट्ठसहिया पायच्छित्तं गिहत्थाणं ॥ ३१० ॥**

घाते एकविंशतिः द्विगुणद्विगुणक्रमसहिताः ।
अन्तादिषष्ठसाहिताः प्रायश्चित्तं गृहस्थानाम् ॥

**सयलं पि इमं भणियं महावलाणं पुराणपुरिसाणं ।**
**संपइकालेत्थ गुरुमासेहिंतो परं णत्थि ॥ ३११ ॥**

सकलमपि इदं भणितं महाबलानां पुराणपुरुषाणां ।
संप्रतिकालेऽत्र गुरुमासात् परं नास्ति ॥

**एदं पायच्छित्तं चराविऊणं जिणालए अरण्णे वा ।**
**तो पच्छा आयरिओ लोयस्स वि चित्तगहणत्थं ॥ ३१२ ॥**

एतत्प्रायश्चित्तं चारयित्वा जिनालयेऽरण्ये वा ।
ततः पश्चादाचार्यः लोकस्यापि चित्तग्रहणार्थं ॥

**जिणभवणंगणदेसे गोमयगोमुत्तदुद्धदहिएहिं ।**
**घयसहिएहिं कराविय सत्तमहामंडलाइं फुडं ॥ ३१३ ॥**

जिनभवनाङ्गणदेशे गोमयगोमूत्रदुग्धदधिभिः।
घृतसहितैः कारापयित्वा सप्तमहामण्डलानि स्फुटं ॥

**तो तं मुंडियसीसं वइसारिय मंडलेसु छसु कमसो।**
**जलपंचदव्वघयदहिपयगंधजलाहिं पुण्णेहिं ॥ ३१४ ॥**

ततः तं मुंडितशीर्षं वेशयित्वा मंडलेषु षट्सु क्रमशः।
जलपंचद्रव्यघृतदधिपयोगन्धजलैः पूर्णैः ॥

**वरवारएहिं समं अहिसिंचिय संघसंतिघोसेण।**
**पच्छा सत्तममंडलठियस्स से संघसमवाओ ॥ ३१५ ॥**

वरवारिभिः समं अभिषिंच्य संघशान्तिघोषेण।
पश्चात् सप्तमण्डलस्थितस्य तस्य संघसमवायं ॥

**जलपुप्फक्खयसेसादाणेहिं परममंगलासीहिं।**
**अहिणंदियंगसोहिं देउ फुडं जिणवयसमेओ ॥ ३१६ ॥**

जलपुष्पाक्षतशेषादानैः परममंगलाशीर्भिः।
अभिनंदिताङ्गशुद्धिं ददातु स्फुटं जिनव्रतसमेतां ॥

**तो णियभवणपइट्ठो जिणमहिमं संघभोयणं कुणऊ।**
**लोयाण चित्तगहणं च वत्थधणभोयणादीहिं ॥ ३१७ ॥**

ततः निजभवनप्रविष्टः जिनमहिमां संघभोजनं करोतु।
लोकानां चित्तग्रहणं च वस्त्रधनभोजनादिभिः ॥

**पाओ लोओ चित्तं तस्स मणोचित्तगाहयं कम्मं।**
**लोयस्स जं तमेव हि पायच्छित्तं ति जिणवुत्तं ॥ ३१८ ॥**

प्रायो लोको चित्तं तस्य मनः चित्तग्राहकं कर्म।
लोकस्य यत्तदेव हि प्रायश्चित्तमिति जिनोक्तम् ॥

**तेणिह सव्वपयारेण जणमणोवज्झणं गिहत्थेण ॥**
**काऊण दोससुद्धी अणुट्ठियव्वा पयत्तेण ॥ ३१९ ॥**

तेनेह सर्वप्रकारेण जनमनोवर्जनं गृहस्थेन ।
कृत्वा दोषशुद्धिः अनुष्ठातव्या प्रयत्नेन ॥

**उरपरिसप्पादीणं घादे जादम्मि तिण्णि उववासा ।**
**णिद्दिट्ठा गिहिवग्गस्स छेदववहारकुसलेहिं ॥ ३२० ॥**

उरपःरिसर्पादीनां घाते जाते त्रय उपवासाः ।
निर्दिष्टा गृहिवर्गस्य च्छेदव्यवहारकुशलैः ॥

**वियलिंदियाण घादे काउस्सग्गा तदिंदियपमाणा ।**
**इह पुण काउस्सग्गो अट्ठसयउस्सासपरिमाणो ॥ ३२१ ॥**

विकलेन्द्रियाणां घाते कायोत्सर्गाः तदिन्द्रियप्रमाणाः ।
इह पुनः कायोत्सर्गः अष्टशतोच्छ्वासपरिमाणः ।

**विरदाणं पि महव्वयकयादिचारस्स एद्दहो चेव ।**
**काउस्सग्गो अण्णत्थ पुव्वभणिदो त्ति विंति परे ॥ ३२२ ॥**

विरतानामपि महाव्रतकृतातिचारणां एतावानेव ।
कायोत्सर्गः अन्यत्र पूर्वभणित इति ब्रुवन्ति परे ॥

**अण्णा वि अत्थि अणुगुणसिक्खावयदंसणादिचाराणं ।**
**गिहिणो सोही य तं पि य संखेवेणं पवक्खामि ॥ ३२३ ॥**

अन्यापि अस्ति अणुगुणशिक्षाव्रतदर्शनातिचाराणां ।
गृहिणां शुद्धिश्च तामपि च संक्षेपेण प्रवक्ष्यामि ॥

**पंचतिचउव्विहाइं अणुगुणसिक्खावयाइं होंति तहिं ।**
**एक्केके अदिचारा पंचेव अदिक्कमादीया ॥ ३२४ ॥**

पंचत्रिचतुर्विधानि अणुगुणशिक्षाव्रतानि भवन्ति तत्र ।
एकैकस्मिन् अतिचाराः पंचैव अतिक्रमादयः ॥

**पढमो तेसु अदिक्कमदोसो बीओ वदिक्कमो णाम ।**
**अइचार अणाचारो पंचमदोसो अणाभोगो ॥ ३२५ ॥**

प्रथमः तेषु अतिक्रमदोषः द्वितीयः व्यतिक्रमो नाम ।
अतिचारोऽनाचरः पंचमदोषोऽनाभोगः ॥

**मणसुद्धिहाणिवयभंगिच्छाकरणालसत्तवयभंगा ।**
**पच्चावेक्खणविरहो अदिक्कमादीण पज्जाया ॥ ३२६ ॥**

मनःशुद्धिहानि-व्रतभंगेच्छा-करणालसत्व-व्रतभंगाः ।
प्रत्यावेक्षणविरहः अतिक्रमादीनां पर्यायाः ॥

**संका कंखा य तहा विदिगिंच्छा अण्णदंसणपसंसा ।**
**पंच मला सम्मत्ते होंति अणायदणसेवा य ॥ ३२७ ॥**

शंका कांक्षा च तथा विचिकित्सा अन्यदर्शनप्रशंसा ।
पंच मलाः सम्यक्त्वे भवन्ति अनायतनसेवा च ॥

**इय पंचसट्ठिदोसाण सोहणं तस्स अथिरथिरभावं ।**
**अगुणित्तं च गुणित्तं दव्वे खेतम्मि पविभागं ॥ ३२८ ॥**

इति पंचषष्ठिदोषाणां शोधनं तस्य अस्थिरस्थिरभावं
अगुणित्वं च गुणित्वं द्रव्ये क्षेत्रे प्रविभागं ॥

**वयससुभासुभपरिणामतिव्वमंदत्तणं च सत्तं च ।**
**सपरमुणकरणमारिदजीवसरूवं च णाऊणं ॥ ३२९ ॥**

वयःशुभाशुभपरिणामतीव्रमन्दत्वं च सत्वं च ।
स्वपरमुनकरणमारितजीवस्वरूपं च ज्ञात्वा ॥ १

**काउस्सग्गो दाणं जिणपूया एयभत्तमिगठाणं।**
**णिव्वियड्डी पुरिमंडलमुववासो वा तिरत्तं वा ॥ ३३० ॥**

कायोत्सर्गः दानं जिनपूजा एकभक्तमेकस्थानं।
निर्विकृतिः पुरिमण्डलं उपवासो वा त्रिरात्रं वा ॥

**पणयं च भिण्णमासो लहुमासो वा तहेव गुरुमासो।**
**इच्चादि देउ गणी पायच्छित्तं जहाजोग्गं ॥ ३३१ ॥**

पणकं च भिन्नमासं लघुमासं वा तथैव गुरुमासं।
इत्यादिकं ददातु गणी प्रायश्चित्तं यथायोग्यम् ॥

**महु मज्जं मंसं वा दप्पपमादेहिं सेवदि कहिं पि।**
**देसवदी जदि तदो बारस खमणाणि छट्ठदुगं ॥ ३३२ ॥**

मधु मद्यं मासं वा दर्पप्रमादाभ्यां सेवते कथमपि।
देशव्रती यदि तदा द्वादश क्षमणानि षष्ठद्विकं ॥

**पंचुंबरादि खायदि देसवदी जदि पमादवप्पेहिं।**
**तो तस्स हवदि छेदो वे उववासा तिरत्तदुगं ॥ ३३३ ॥**

पंचोदुम्बरादीन् भक्षयति देशव्रती यदि प्रमाददर्पाभ्यां।
तर्हि तस्य भवति च्छेदः द्वौ उपवासौ त्रिरात्रद्विकम् ॥

**सुक्कं मुत्तपुरीसं पमाददप्पेहिं खायदि कहिं पि।**
**देसविरदो तदो सो वे उववासो तिरत्तं च ॥ ३३४ ॥**

शुष्कं मूत्रपुरीषं प्रमाददर्पाभ्यां भक्षयति कथमपि।
देशविरतस्तदा स द्वौ उपवासौ त्रिरात्रं च ॥

**वहुम्मि अंतराए मुहम्मि दिट्ठम्मि भायणे य तहा।**
**णिसुयम्मि होइ सुद्धी दोण्णि दिवड्ढेगखमणाइं ॥ ३३५ ॥**

बृहति अन्तराये मुखे दृष्टे भाजने च तथा ।
निश्रुते भवति शुद्धिः द्वे द्व्यर्धैकक्षमणानि ॥

**कावालिय अण्णपाणे भुत्ते तण्णारिसेवणे य तहा।**
**साभोगे छट्ठतियं णाभोगे एगकल्लाणं ॥ ४३६ ॥**

कापालिकस्यान्नपाने भुक्ते तन्नारीसेवने च तथा ।
साभोगे षष्ठत्रिकं अनाभोगे एककल्याणं ॥

**गोसिंगघादवंदीगिहरोधोलंवणादिमदएसु ।**
**छेत्तेसु तह य देहव्वणांमि किमिएसु पडिएसु ॥ ३३७ ॥**

गोसिंगघातवन्दिगृहरोधालम्बनादिमृतेषु । ?
क्षेत्रेषु तथा च देहे कृमिषु पतितेषु ॥

**कारुगगिहण्णपाणंगणासु भुत्तासु छच्चउत्थाइं ।**
**कारुगपत्तेसु पुणो भुत्ते पंचेव उववासा ॥ ३३८ ॥**

कारुकगृहान्नपानाङ्गनासु भुक्तासु षट्चतुर्थानि ।
कारुकपात्रेषु पुनः भुक्ते पंचैव उपवासाः ॥

**चंडालअण्णपाणे भुत्ते सोलस हवंति उववासा।**
**चंडालाणं पत्ते भुत्ते अट्ठेव उववासा ॥ ३३९ ॥**

चण्डालान्नपाने भुक्ते षोडशा भवन्ति उपवासाः ।
चण्डालानां पात्रे भुक्ते अष्टैव उपवासाः ॥

**चंडालादिसुउणहि मएसु तस्संकरे पमत्तेण ।**
**मासिगमेयं देयं पायच्छित्तं गिहत्थाणं ॥ ३४० ॥**

चंडालादि स्वजनैः ? मृतेषु तत्संकरे प्रमादेन ।
मासिकमेकं देयं प्रायश्चित्तं गृहस्थानाम् ॥

**मादुसुदादीहिं सजोणियाहि चंडालइत्थियाहि समं ।**
**अब्बंभं पुण सेवंते हवंति बत्तीस उववासा ॥ ३४१ ॥**

मातासुतादिभिः स्वयोनिभिः चांडालस्त्रीभिः समं ।
अब्रह्म पुनः सेवमाने भवन्ति द्वात्रिंशदुपवासाः ॥

**छट्ठमणुव्वदघादे गुणवयसिक्खावएहिं उववासो ।**
**दंसणअइचारे पुण जिणपूया होइ णिद्दिट्ठं ॥ ३४२ ॥**

षष्ठं अणुव्रतघाते गुणव्रतशिक्षाव्रताभ्यां उपवासः ।
दर्शनातिचारे पुनः जिनपूजा भवति निर्दिष्टा ॥

**पुप्फवदी पुप्फवदीए सजादीए जदि छिवंति अण्णोणं ।**
**दोण्हाणम्मि विसोही ण्हाणं खवणं च गंधुदयं ॥ ३४३ ॥**

पुष्पवती पुष्पवत्या सजात्या यदि स्पृशति अन्योन्यं ।
द्वयोरपि विशुद्धिः स्नानं क्षमणं च गन्धोदकम् ॥

**बंभणखत्तियमहिला रजस्सलाओ छिवंति अण्णोण्णं ।**
**तो पढमद्धकिरिच्छं पादकिरिच्छं परा चरइ ॥ ३४४ ॥**

ब्राह्मणक्षत्रियमहिला रजस्वलाः स्पृशन्ति अन्योन्यं ।
तर्हि प्रथमा अर्धकिरिच्छं पादकिरिच्छं परा चरति ॥

**तिविहाहारविवज्जणलक्खणखमणं दिणंतभुत्ती य ।**
**एकट्ठाणं आयंबिलं च एदं किरिच्छमिह ॥ ३४५ ॥**

त्रिविधाहारविवर्जनलक्षणं क्षमणं दिनान्तभुक्तिश्च ।
एकस्थानं आचाम्लं च एतत् किरिच्छमिह ॥

**बंभणवणिमहिलाओ रयस्सलाओ छिवंति अण्णोण्णं ।**
**तो पादूणं पढमा पादकिरिच्छं परा चरइ ॥ ३४६ ॥**

ब्राह्मणवणिग्महिला रजस्वलाः स्पृशान्ति अन्योन्यं ।
तर्हि पादोनं प्रथमा पादकिरिच्छं परा चरति ॥

**बंभणसुद्दित्थीओ रयस्सलाओ छिवंति अण्णोणं ।**
**पढमा सव्वकिरिच्छं चरेइ इदरा च दाणादिं ॥ ३४७ ॥**

ब्राह्मणशूद्रस्त्रियः रजस्वलाः स्पृशान्ति अन्योन्यं ।
प्रथमा सर्वकिरिच्छं चरति इतरा च दानादि ॥

**खत्तियवणिमहिलाओ रयस्सलाओ छिवंति अण्णोण्णं ।**
**तो पढमद्धकिरिच्छं पादकिरिच्छं परा चरइ ॥ ३४८ ॥**

क्षत्रियवणिग्महिला रजस्वलाः स्पृशान्ति अन्योन्यं ।
तर्हि प्रथमा अर्धकिरिच्छं पादकिरिच्छं परा चरति ॥

**खत्तियसुद्दित्थीओ रयस्सलाओ छिवंति अण्णोणं ।**
**तो पादूणं पढमा पादकिरिच्छं परा चरइ ॥ ६४९ ॥**

क्षत्रियशूद्रस्त्रियः रजस्वलाः स्पृशांति अन्योन्यं ।
तर्हि पादोनं प्रथमा पादकिरिच्छं परा चरति ॥

**वाणियसुद्दित्थीओ रयस्सलाओ छिवंति अण्णोण्णं ।**
**तो खवणतिगं पढमा चरइ परा खमणमेगं तु । ३५० ॥**

वणिक्शूद्रस्त्रियः रजस्वलाः स्पृशन्ति यदि अन्योन्यं ।
तर्हि क्षमणत्रिकं प्रथमा चरति परा क्षमणमेकं तु ॥

**पुप्फवदी जदि णारी छिप्पइ जइ चंडालमंडालादीहिं ।**
**तो ण्हाणदिणत्ति णिराहारा ण्हाऊण सुज्झिज्जा ॥ ३५१ ॥**

पुष्पवती यदि नारी स्पृशति यदि चण्डालमण्डलादिभिः ।
तर्हि स्नानदिनमिति निराहारा स्नात्वा शुद्ध्यति ॥

**खत्तियबंभणवइसासुद्दा वि य सूतगम्मि जायम्मि ।**
**पणं[1] दस बारस पण्णरसेहि दिवसेहिं सुज्झंति ॥ ३५२ ॥**

क्षत्रियब्राह्मणवैश्याः शूद्रा अपि च सूतके जाते ।
पंचदशद्वादशपंचदशाभिः दिवसैः शुद्ध्यन्ति ॥

**बालत्तणसूरत्तणजलणादिपवेसदिक्खंतेहिं ।**
**अणसणपरदेसेसु य मुदाण खलु सूतगं णत्थि ॥ ३५३ ॥**

बालत्वशूरत्वज्वलनादिप्रवेशदीक्षितैः ।
अनशानपरदेशेषु च मृतानां खलु सूतकं नास्ति ॥

**जावदिआ अविसुद्धा परिणामा तेत्तिया अदीचारा ।**
**को ताण पायछित्तं दाउं काउं च सक्केज्जो ॥ ३५४ ॥**

यावन्तोऽविशुद्धाः परिणामाः तावन्तोऽतिचाराः ।
कस्तेषां प्रायश्चित्तं दातुं कर्तुं च शक्नुयात् ॥

---

1 बारस दस तह पण्णरस तिंसदि दिवसेहिं सुज्झंति पाठान्तरं ।

**तह्मा थूलदिचाराणेदं मलसोहणं समुद्दिट्ठं ।**
**सुहमदिचाराणां पुण णियत्तणं चेव मलहरणं ॥ ३५५ ॥**

तस्मात् स्थूलातिचाराणामिदं मलशोधनं समुद्दिष्टं ।
सूक्ष्मातिचाराणां पुनः निर्वर्तनं चैव मलहरणं ॥

**एदं पायच्छित्तं बहुआयरिओवदेसमवगम्मं ।**
**जीदादिगाइं सत्थाइं सम्ममवधारिऊणं च ॥ ३५६ ॥**

एतत्प्रायश्चित्तं बह्वाचार्योपदेशमवगम्य ।
जीतादिकानि शास्त्राणि सम्यगवधार्य च ॥

**अणुकंपाकहणेण य विरामवयगहण सह तिसुद्धीए ।**
**पादद्धतयं सव्वं णासइ पावं ण संदेहो ॥ ३५७ ॥**

अनुकम्पाकथनेन च विरामव्रतग्रहण ? सह त्रिशुद्ध्या ।
पादार्धत्रयं सर्वं नाशयति पापं न सन्देहः ॥

**चाउव्वणपराधविसुद्धिणिमित्तं मए समुद्दिट्ठं ।**
**णामेण छेदपिंडं साहुजणो आयरं कुणउ ॥ ३५८ ॥**

चातुर्वर्ण्यापराधविशुद्धिनिमित्तं मया समुद्दिष्टं ।
नाम्ना छेदपिण्डं साधुजनः आदरं करोतु ॥

**परमट्ठसुद्धिववहारसुद्धिभेदेसु जं विरुद्धत्थं ।**
**लिहिदमिहऽणाणत्तेण तं वि सोहंतु छेदण्हू ॥ ३५९ ॥**

परमार्थशुद्धिव्यवहारशुद्धिभेदेषु यत् विरुद्धार्थं ।
लिखितमिह अज्ञानत्वेन तदपि शोधयन्तु छेदज्ञाः ॥

**चउरसयाइं वीसुत्तराइं गंथस्स परिमाणं ।**
**तेतीसुत्तरतिसयपमाणं गाहाणिबद्धस्स ॥ ३६० ॥**

चतुःशतानि विंशत्युत्तराणि ग्रन्थस्य परिमाणं ।
त्रयस्त्रिंशदुत्तरत्रिशतं प्रमाणं गाथानिबद्धस्य ॥

**भावेइ छेदपिंडं जो एदं इंदणंदिगणिरचिदं ।**
**लोइयलोउत्तरिए ववहारे होइ सो कुसलो ॥ ३६१ ॥**

भावयति च्छेदपिंडं य एतदिन्द्रनन्दिगणिरचितं ।
लौकिकलोकत्तरे व्यवहारे भवति स कुशलः ॥

**इय इंदणंदिजोइंदविरइयं सज्जणाण मलहरणं ।**
**लिहियं तं भत्तीए सम्मत्तपसत्तचित्तेण ॥ १ ॥**

इति इन्द्रनन्दियोगींद्रविरचितं सज्जनानां मलहरणं ।
लिखितं तत् भक्त्या सम्यक्त्वप्रसन्नचित्तेन ॥

**इति प्रायश्चितग्रन्थः समाप्तः ।**

# छेदशास्त्रम् ।

## छेदनवत्यपरनाम

## वृत्तिसहितम् ।

**णमिऊण य पंचगुरुं गणहरदेवाण रिद्धिवंताणं ।**
**वुच्छामि छेदसत्थं साहूणं सोहणट्ठाणं ॥ १ ॥**

नत्वा च पंचगुरून् गणधरदेवान् ऋद्धिवतः ।
वक्ष्यामि छेदशास्त्रं साधूनां शोधनस्थानम् ॥

**पायच्छित्तं सोही मलहरणं पावणासणं छेदो ।**
**पज्जाया[1] मूलगुणं[2] मासिय संठाण पंचकल्लाणं ॥ २ ॥**

प्रायश्चित्तं शुद्धिः मलहरणं पापनाशनं छेदः ।
पर्यायाः मूलगुणं मासिकं संस्थानं पंचकल्याणं ॥

**आयंविल णिव्वियडी पुरिमंडल[3]मेयठाण[4] खमणाणि ।**
**एयं खलु कल्लाणं[5] पंचगुणं[6] जाण मूलगुणं ॥ ३ ॥**

आचाम्लं निर्विकृतिः पुरिमण्डलं एकस्थानं क्षमणानि ।
एकं खलु कल्याणं पंचगुणं जानीहि मूलगुणं ॥

**आदीदो[7] चउमज्झे एक्कद्दरवणियम्मि लहुमासं ।**
**छम्मासे संठाणं ठाणं छम्मासियं जाण ॥ ४ ॥**

---

१ एतानि प्रायश्चित्तादीनि पंच प्रायश्चित्तस्य नामानि । २ व्रतसमित्याद्यष्टाविंशतिः मद्यमांसमधुत्यागाद्यष्टौ वा । ३ वस्तुसंख्या । ४ एकभक्तं । ५ कल्याणमेकं । ६ पंचकल्याणकैर्मूलगुणमेकं । ७ मूलगुणस्थानाच्चतुर्थस्थानके कल्याणकनामाचरणस्य संख्या त्रिधा ।

आदितः चतुर्मध्ये एकतरापनीते लघुमासं ।
षण्मासे संस्थानं स्थानं षण्मासिकं जानीहि ॥

**आयंविलम्मि पादूण खवणपुरिमंडले तहा पादो ।**
**पयट्ठाणे अद्धं णिव्वियडीए वि एमेव ॥ ५ ॥**

आचाम्ले पादोनं क्षमणपुरिमंडलयोः तथा पादः ।
एकस्थानेऽर्धं निर्विकृतावपि एवमेव ॥

मूलगुणं भवियं एकोऽर्थः । मासिय संठाण पंचकल्लाणं इत्येकोऽर्थः ॥

**एक्कम्मि विउसग्गे णव णवकारा हवंति बारसहिं ।**
**सयमट्ठोत्तरमेदे हवंति उववासा य (ज) स्स फलं ॥ ६ ॥**

एकस्मिन् व्युत्सर्गे नव नमस्कारा भवन्ति द्वादशैः ।
शतमष्टोत्तरं एते भवन्ति उपवासा यस्य फलम् ॥

**अस्याँ अर्थः**—कायोत्सर्गैकस्य नमस्कारा नव भवन्ति । कायोत्सर्गैर्द्वादशैरष्टोत्तरशतं भवन्ति । तेनाष्टोत्तरशतेनोपवासमेकं लभ्येत ॥

**मूलगुणा वि य दुविहा सवणाणं तह य सावयाणं च ।**
**उत्तरगुणा तहेव य तेसिं सोहिं पवक्खामि ॥ ७ ॥**

मूलगुणा अपि च द्विविधाः श्रमणानां तथा च श्रावकाणां च ।
उत्तरगुणाः तथैव च तेषां शुद्धिं प्रवक्ष्ये ॥

**एइंदियादि कादुं इंदियगणणाइ जाम चउरिंदी ।**
**काउस्सग्गा य तहा बारसछच्चउतिहि खमणं ॥ ८ ॥**

एकेन्द्रियादिं कृत्वा इन्द्रियगणनया यावत् चतुरिन्द्रियान् ।
कायोत्सर्गाश्च तथा द्वादशषट्चतुस्त्रिभिः क्षमणं ॥

**अस्या अर्थः**—एइंदियकायोत्सर्ग ( १ ) वेइंदियकायोत्सर्ग ( २ ) ते इंदियकायोत्सर्ग ( ३ ) चउरिंदीयकायोत्सर्ग ( ४ )। "बारस छचउतिहिं खमणं" अस्यार्थः–एकेन्द्रियाणां १२ ( द्वादशानां घाते ) उपवासमेकं । द्वीन्द्रियाणां ६ ( षण्णां घाते ) उपवासमेकं । त्रीन्द्रियाणां ४ ( चतुर्णां ) उपवासमेकं । चतुरिन्द्रियाणां ३ ( त्रयाणां ) उपवासमेकं ।

**छत्तीसट्ठारसएवारसनवएहिं छट्ठपडिकमणं ।**
**सीदिसयं णउदीहि य सट्ठी पणदालएहि मूलगुणं ॥ ९ ॥**

षट्त्रिंशदष्टादशद्वादशनवकैः षष्ठप्रतिक्रमणं ।
अशीतिशतनवतिभिः च षष्टिपंचचत्वारिंशद्भिः मूलगुणं ॥

**अस्या अर्थः**—एकेन्द्रियाणां अशीत्यधिकशतस्य पंचकल्याणमेकं पूर्वार्धप्रतिक्रमणं भवति । द्वीन्द्रियाणां नवतीनां पंचकल्याणं । त्रीन्द्रियाणां षष्टीनां पंचकल्याणं । चतुरिन्द्रियाणां पंचचत्वारिंशानां पंचकल्याणं पूर्वार्धप्रतिक्रमणपूर्वकं भवति ॥

**पंचिंदिया असण्णी वहमाणेऽचेलमूलगुणवंते ।**
**थिर अथिर पयदचारी अप्पयदे वा वि इदरो (रे) य ॥ १० ॥**

पंचेन्द्रियाणामसंज्ञिनां वधेऽचेलमूलगुणवति ।
स्थिरेऽस्थिरे प्रयत्नचारिणि अप्रयत्ने वाऽपि इतरस्मिन् च ॥

**अस्या अर्थ**—एकासंज्ञिपंचेन्द्रिय अप्रमत्तः स्थिरः विपरीतः एवमष्टभगो जातः ( ? ) ॥

**ताण कमेण य छेदो तिण्णुववासा य छट्ट ( छट्ठ ) मूलगुणं ।**
**पणगं तिण्णुववासा छट्ठं लहुमेव एकम्हि ॥ ११ ॥**

तेषां क्रमेण च छेदः त्रय उपवासाश्च षष्ठं षष्ठं मूलगुणं ।
पंचकं त्रय उपवासाः षष्ठं लघु एव एकस्मिन् ॥

---

१ एकेन्द्रियजीव–वधे एकः कायोत्सर्गः । द्वीन्द्रीये द्वौ इत्यादि । एवमग्रेऽपि ॥

**अस्या अर्थः**—अष्टजनेभ्यः प्रायश्चित्तं प्रति क्रमेण । एकासंज्ञिपंचेन्द्रिये हते मूलगुणे स्थिरः प्रयत्नचारी तस्योपवासत्रयं । मूलधारिणोऽप्रयत्ने स्थिरस्य षष्ठं स्यात् । मूलगुणेऽस्थिरस्य यत्नपरस्य षष्ठं स्यात् । मूलगुणेऽस्थिरस्य अप्रयत्नपरस्य कल्याणं । उत्तरगुणे स्थिरस्य प्रयत्नपरस्य कल्याणं । उत्तरगुणे स्थिरस्य अप्रयत्नपरस्य उपवासत्रयं । उत्तरगुणेऽस्थिरस्य प्रयत्नपरस्य षष्ठमेकं । उत्तरगुणेऽस्थिरस्य अप्रयत्नचारिणः लघुकल्याणकमेकं । अथैकवारं अज्ञानतो ज्ञानतो वारं वारं वा मूलगुणधारिणां सप्रयत्नस्थिरत्रिरात्रं ( षष्ठं ) । मूलगुणधारिणां अप्रयत्नतः ( स्थिराणां ) लघुकल्याणमेकं मूलगुणेऽस्थिरः प्रयत्नपरः पंचकल्याणं । अस्थिरः अप्रयत्नः मूलच्छेदं । उत्तरगुणे स्थिरः प्रयत्नपरः उपवासत्रयं । उत्तरगुणे स्थिरः अप्रयत्नपरः षष्ठं । उत्तरगुणेऽस्थिरप्रयत्नपरः लघुकल्याणमेकं । अस्थिरोत्तरगुणस्य अप्रयत्नपरस्य पंचकल्याणमेकं बहुवारं ॥

**बहुवारेसु य छेदो छट्ठं लहु मासियं च मूलं पि ।**
**तिण्णुववासा छट्ठं लहु संठाणमट्ठण्हं ॥ १२ ॥**

बहुवारेषु च च्छेदः षष्ठं लघु मासिकं च मूलमपि ।
त्रय उपवासाः षष्ठं लघु संस्थानमष्टानाम् ॥

अस्या गाथाया अर्थः पश्चिमगाथायां प्रागुक्तः ॥

**उत्तरमूलगुणाणं पमाददप्पम्मि जाण मलहरणं ।**
**काउस्सग्गुववासा इंदियगणणा य पाणगणणा य ॥ १३ ॥**

उत्तरमूलगुणानां प्रमाददर्पयोः जानीहि मलहरणं ।
कायोत्सर्गोपवासा इन्द्रियगणनया च प्राणगणनया च ॥

**अस्या अर्थः**—उत्तरगुणधारिणः प्राणगणनया ( इन्द्रियगणनया ) प्रमादे कायोत्सर्गाः असंज्ञिपंचेन्द्रियं यावत् । उत्तरगुणधारिणः दर्पे इन्द्रियगणनया प्राणगणनया उपवासाः । ( मूलगुणधारिणः प्रमादे इन्द्रियगणनया कायोत्सर्गाः ) । मूलगुणधारिणो दर्पे प्राणगणनया उपवासा असंज्ञिपंचेन्द्रियं यावत् ॥

---

१ यत्नेकृतेऽपि जीववधे सति । २ अप्रयत्ने कृते ।

**अहवा जत्ताजत्ते इंदियगणणा य पाणगणणा य ।**
**काउस्सग्गा होंति हु उववासा बारसादीहिं ॥ १४ ॥**

अथवा यत्नायत्नयोः इन्द्रियगणनया च प्राणगणनया च ।
कायोत्सर्गा भवन्ति हि उपवासा द्वादशादिभिः ॥

**अस्या अर्थः**—एवं प्रयत्ने इन्द्रियगणनया कायोत्सर्गः । अप्रयत्नस्य प्राणगणनया कायोत्सर्गः ॥

**रिसिसावयबालाणं इत्थीगोघादणह्मि मलहरणं ।**
**बारसमासादीणं अद्धद्धकमेण छट्ठ तवं ॥ १५ ॥**

ऋषिश्रावकबालानां स्त्रीगोघातने मलहरणम् ।
द्वादशमासादीनां अर्धार्धक्रमेण षष्ठं तपः ॥

**अस्या अर्थः**—ऋषिघातकस्य द्वादशमासं यावत् षष्ठं । श्रावकघातकस्य षण्मासास्त्रिरात्रं । बालकघातकस्य त्रिमासं त्रिरात्रं । स्त्रीवधकस्य अर्धमासैकं षष्ठं । गोवधकस्य पंचविंशतिदिनानि त्रिरात्रं ॥

**पासंडातब्भत्ता जोणिसरिसाण घादणे छेदो ।**
**छम्मासं छट्ठतवं अद्धद्धकमेण कायव्वं ॥ १६ ॥**

पाषंडतद्भक्तानां योनिसदृशानां घातने च्छेदः ।
षण्मासं षष्ठतपः अर्धार्धक्रमेण कर्तव्यं ॥

**अस्या अर्थः**—अन्यलिंगिवधायां षण्मासानि षष्ठं भवति । दिक्षितवधायां मासत्रयं त्रिरात्रं । तद्भक्ता महेश्वरादयस्तेषां वधायां सार्धमासं त्रिरात्रं ॥

**बंभणखत्तियवइसा सुद्दा चउगायगमणघादम्मि ।**
**एयंतरअट्ठमासे अद्धद्धं छट्ठमंते च ॥ १७ ॥**

ब्राह्मणक्षत्रियवैश्यानां शूद्राणां चतुष्पदगमनघातने ।
एकान्तराष्टमासा अर्धार्धं षष्ठमन्ते च ॥

**अस्या अर्थः**—ब्राह्मणवधायां मासाष्टकं एकान्तरं अन्ते षष्ठं । क्षत्रियघाते चतुर्मासमेकान्तरमन्ते षष्ठं । वैश्यवधे द्विमासमेकान्तरमन्ते षष्ठं । शूद्रवधे मासमेकान्तरं अन्ते षष्ठं । ग्राममृगे चतुष्पदवधे पंचदशदिवसमेकान्तरं अन्ते षष्ठं ॥

**तणमंसासिविहंगा उरपरिसप्पाण जलचरवहम्मि ।**
**चउदसआइं काउं णवखमणाणि मलहरणं ॥ १८ ॥**

तृणमांसाशिविहंगानां उरःपरिसर्पाणां जलचरवधे ।
चतुर्दशादिकं कृत्वा नवक्षमणानि मलहरणं ॥

**अस्या अर्थः**—तृणचराणां वधे चतुर्दशोपवासाः । मांसाहारिचतुष्पदवधे त्रयोदशोपवासाः । पक्षिवधे द्वादशोपवासाः । सर्पवधे एकादशोपवासाः । शरर( ट ) वधे दशोपवासाः । जलचरवधे नवोपवासाः ॥

एवं प्रथमव्रतमुपगतम् ।

---

**सइ पच्चक्ख परोक्खे उभयं तियकरण मोसभासिस्स ।**
**काओसग्गुववासा एगुत्तर असइ संठाणं ॥ १९ ॥**

सकृत् प्रत्यक्षे परोक्षे उभयस्मिन् त्रिकरणे मृषाभाषिणः ।
कायोत्सर्गोपवासा एकोत्तरा असकृत् संस्थानं ॥

**अस्या अर्थः**—एकवारं प्रत्यक्षे असत्यमुक्ते कायोत्सर्गं । परोक्षे असत्यमुक्ते उपवासमेकं । प्रत्यक्षपरोक्षे असत्यमुक्ते उपवासद्वयं । मनोवचनकाये असत्यमुक्ते उपवासत्रयं । बहुवारं प्रत्यक्षे कल्याणमेकं । परोक्षेऽपि पंचकल्याणं । उभयासत्येऽपि पंचकल्याणम् ॥

एवं सत्यव्रतम् ।

---

**सइ सुण्णम्हि समक्खे अणासभोगे अदत्तगहणम्मि ।**
**काउस्सग्गुववासा एगुत्तर असइ मूलगुणं ॥ २० ॥**

सकृच्छून्ये समक्षे अनाभोगे अदत्तग्रहणे ।
कायोत्सर्गोपवासा एकोत्तरा असकृत् मूलगुणं ॥

**अस्या अर्थः**—निर्जनेऽदृश्यमाने मोहेन गृहीतं तावत् क्षणेन पुनस्तत्रैव स्थापितं कायोत्सर्गैकेन शुद्धयति । प्रत्यक्षे उपवासः । अनालोचिते उपवासद्वयं । ज्ञाते गृहीते उपवासत्रयं । बहुवारान् गृहीते पंचकल्याणं । कस्येदं भणित्वा गृहीते पंचकल्याणम् ॥

अदत्तादानविरतिव्रतम्

---

**पादोसणियमरहिए वंदणसहियस्स हीणसज्झाए ।**
**सुत्तस्स रेदखिरणे उवठावण दुण्णि खवणाणि ॥ २१ ॥**

प्रदोषनियमरहिते वन्दनासहितस्य हीनस्वाध्याये ।
सुप्तस्य रेतःक्षरणे उपस्थापनं द्वे क्षमणे ॥

**अस्या अर्थः**—प्रथमनिशि समये प्रहरे नियमस्वाध्यायं विना देववन्दनाकृते तु सुप्ते दुःस्वप्ने दृष्टे प्रतिक्रमणमुपवासद्वयं । नियमे कृते देववन्दनास्वाध्यायं विना निद्रायां रेतःस्रावे नियमसहितमुपवासमेकम् ॥

**णियमे जुत्तस्स पुणो सेसे रहिदस्स छेद पुव्वह्मि ।**
**सज्झायरहियसुत्तो पावइ उववास णियमं च ॥ २२ ॥**

नियमेन युक्तस्य पुनः शेषे रहितस्य छेदः पूर्वस्मिन् ।
स्वाध्यायरहितसुप्तः प्राप्नोति उपवासं नियमं च ॥

**अस्या अर्थः**—स्वाध्यायारहितः सुप्तः देववन्दनाप्रतिक्रमणकृते रात्रौ निद्रायां स्वप्ने सति रेतःपरिस्रावो जातः प्राप्नोति उपवाससहितं प्रतिक्रमणम् ॥

**रादिं णियम्मे सुत्तो पच्छिमभायम्मि गहियसज्झाओ ।**
**णियमुववासेण तहा सोहिज्जइ रेदखिरणेण ॥ २३ ॥**

रात्रौ नियमेन सुप्तः पश्चिमभागे गृहितस्वाध्यायः ।
नियमोपवासाभ्यां तथा शुद्ध्यते रेतःक्षरणेन ॥

**अस्या अर्थः**—उदिते प्रहरे स्वाध्याये गृहीते नियमदेववन्दनाकृते निद्रायां दुःस्वप्ने जाते प्रतिक्रमणपूर्वकमुपवासं । अथ प्रतिक्रमणं विना उपवासद्वयम् ॥

**सज्झायणियमसहिदे वंदणरहियस्स रेदणिस्सरणे ।**
**उवठावण उववासो सोहिज्जइ रेदखिरणेण ॥ २४ ॥**

स्वाध्यायनियमसहिते वन्दनारहितस्य रेतोनिःसरणे ।
उपस्थापनेन उपवासेन शुद्ध्यते रेतःक्षरणेन ॥

**अस्या अर्थः**—पूर्व एव कथितः ॥

**सज्झायणियमवंदण तिण्णि वि काऊण जो सुयइ साहू ।**
**रेते णिस्सरणम्हि य उवठावण छट्ठ दिवसम्मि ॥ २५ ॥**

स्वाध्यायनियमवन्दनाः तिस्रोऽपि कृत्वा यः स्वपिति साधुः ।
रेतसि निःसरणे च उपस्थापनं षष्ठं दिवसे ॥

**अस्या अर्थः**—स्वाध्यायनियमवन्दनावसाने निद्रायामतिचारे प्रतिक्रमणपूर्वकं त्रिरात्रं । मध्यान्हे प्रतिक्रमणषष्ठम् ॥

**अब्बंभं भासंतो इत्थिम्हि य मोहिदो य इच्छंतो ।**
**काउस्सग्गुववासो उववासा छट्ट दप्पम्मि ॥ २६ ॥**

अब्रह्म भाषमाणः स्त्रियां च मोहितश्चेच्छन् ।
कायोत्सर्गोपवासौ उपवासौ षष्ठं दर्पे ॥

**अस्या अर्थः**—सकामवचनभाषी स्त्रीदर्शनाभिलाषे उपवासमेकं । चित्ताभिलाषपरिणामे उपवासौ द्वौ । स्त्रीदर्शनचित्ताभिलाषे–इन्द्रियोत्कोचने उपवासत्रयम् ॥

**तिरियाईउवसग्गे अब्बंभं सेवयस्स मूलगुणं ।**
**मूलट्ठाणं दप्पे तिरियाणं सुद्धस्स जणणाए ॥ २७ ॥**

तिर्यगाद्युपसर्गे अब्रम्ह सेवमानस्य मूलगुणं ।
मूलस्थानं दर्पेण तिरश्चां शुद्धस्य जनज्ञाते ॥

**अस्या अर्थः**—तिर्यंचं अब्रह्मसेवनात् पंचकल्याणं । लोकविदिते उद्धते मनोवाक्कायसंभवे मूलं याति ॥

चतुर्थं व्रतम् ।

---

**उवयरणठवण लोहे दीणमुहो दाणगहणविक्खादे ।**
**संगग्गहणे खमणं छट्ठट्ठम मूलगुण मूलं ॥ २८ ॥**

उपकरणस्थापने लोभे दीनमुखः दानग्रहणविख्याते ।
संगग्रहणे क्षमणं षष्ठं अष्टमं मूलगुणं मूलं ॥

**अस्या अर्थः**—केनचित् पुरुषेण स्थापिते नष्टे सति उपवासः । लोभेन स्थापिते षष्ठोपवासः । दीनमुखो याच्यमानोऽष्टमं । बहुजनमध्येऽतीव याच्यमानो दीनः पंचकल्याणं । अवलुप्ते लुब्धो जातः मूलस्थानं याति ॥

पंचमं व्रतम् ।

---

**रत्ति गिलाणभत्ते चउविह एकम्हि छट्ठ * खमणाओ ।**
**उवसग्गे संठाणं चरियापवियस्स मूलमिदी * ॥ २९ ॥**

रात्रौ ग्लानभक्ते चतुर्विधे एकस्मिन् षष्ठं क्षमणं ।
उपसर्गे संस्थानं चर्याप्रविष्टस्य मूलमिति ॥

**अस्या अर्थः**—रात्रौ व्याधियुक्ते चतुर्विधाहारे षष्ठं । अथैकविधाहारे भुक्ते उपवासः । उपसर्गे रात्रिभोजी पंचकल्याणं । रात्रौ चर्याप्रविष्टः मूलं गच्छति । न तस्य पंक्तिभोजनमिति ॥

षष्ठं व्रतम्

---

* पुष्पमध्यगतः पाठः पुस्तकाच्च्युतः । अतः स्वबुद्ध्या परिकल्प्य पूर्णीकृतः ।—सं

**वायामगमण मुणिणो उवमग्गे पासुगे असुद्धम्हि ।**
**काउस्सग्गो खमणं अपुण्णकोसह्मि दायव्वं ॥ ३० ॥**

व्यायामगमने मुनेः उन्मार्गे प्रासुकेऽशुद्धे ।
कायोत्सर्गः क्षमणं अपूर्णक्रोशे दातव्यं ॥

**अस्या अर्थः**—गयउमध्ये व्यायामे प्रासुके कायोत्सर्गः । उत्पथगमनात् अप्रासुके उपवासः ॥

**वासारत्ते दिवसे पासुगपंथम्हि इयर राई च ।**
**तिण्णिदुयतियदुइकोसे एक्केक्कं तियचऊखमणा ॥ ३१ ॥**

वर्षा-ऋतौ दिवसे प्रासुकपथे इतरस्मिन् रात्रौ च ।
त्रिद्वित्रिद्विक्रोशे एकैकं त्रिचतुःक्षमणानि ॥

**अस्या अर्थः**—प्रावृट्काले प्रासुके दिवसे क्रोशत्रये उपवासमेकं । मध्यान्हेऽपराह्ले वा अप्रासुके दिवसे क्रोशद्वये उपवासमेकं । रात्रौ प्रासुके क्रोशत्रये उपवासत्रयं । रात्रौ अप्रासुके क्रोशद्वये उपवासचतुष्टयम् ॥

**हेमंते वि हु दिवसे पासुगपंथह्मि इयर राई च ।**
**छच्चउछच्चउकोसा एक्केक्कं विण्णि तियखमणा ॥ ३२ ॥**

हेमन्तेऽपि हि दिवसे प्रासुकपथे इतरस्मिन् रात्रौ च ।
षट्चतुःषट्चतुःक्रोशाः एकैकं द्वे त्रिक्षमणानि ॥

**अस्या अर्थः**—हेमन्तेऽपराह्ले प्रासुके क्रोशषण्णामुपवासमेकं । मध्यान्हेऽप्रासुके क्रोशचतुर्णां उपवासमेकं । रात्रौ प्रासुके क्रोशषण्णामुपवासद्वयं । रात्रौ अप्रासुके क्रोशचतुर्णां उपवासत्रयम् ॥

**गिंभे दिवसम्मि तहा पासुगपंथेहि इयर राई च ।**
**णवछणवछकोसे एक्केक्कं दो य दो खमणा ॥ ३३ ॥**

ग्रीष्मे दिवसे तथा प्रासुकपथे इतरस्मिन् रात्रौ च ।
नवषट्नवषट्क्रोशे एकैकं द्वे च द्वे क्षमणे ॥

**अस्या अर्थः**—ग्रीष्मे मध्यान्हे प्रासुकपथे नवक्रोशानां उपवासमेकं । रात्रौ प्रासुकपथे नवक्रोशानामुपवासद्वयं । अप्रासुके षण्णां क्रोशानां उपवासमेकं । अप्रासुके रात्रौ षण्णां क्रोशानामुपवासद्वयम् ॥

**काउस्सग्गे सुज्झदि सत्तसु पादेसु पिच्छरहिदेसु ।**
**गव्वूदिगमण खमणं णोखमणं होइ णिप्पिच्छे ॥ ३४ ॥**

कायोत्सर्गेण शुद्ध्यति सप्तसु पादेषु पिच्छिकारहितेषु ।
गव्यूतिगमने क्षमणं नोक्षमणं भवति निष्पिछे ॥

**अस्या अर्थः**—प्रकटार्थः ॥

**जण्हम्मि विउस्सग्गे खमणं चउरंगुलम्मि तस्सुवरिं ।**
**तत्तो य दुगुणदुगुणा उववासा अंगुलचउक्के ॥ ३५ ॥**

जानौ व्युत्सर्गेण क्षमणं चतुरंगुले तस्योपरि ।
ततश्च द्विगुणद्विगुणा उपवासा अंगुलचतुष्के ॥

**अस्या अर्थः**—नद्यामुत्तरणे जानुमात्रपानीयं भवति तदा कायोत्सर्गेण शुद्ध्यते । तदूर्ध्वं चतुरंगुलप्रमाणेन द्विगुणद्विगुणाउपवासा भवन्ति ॥

ईर्यासमितिः ।

---

**भासंताणं मज्झे जो बोल्लइ पुव्वछिण्णदोसं च ।**
**काउस्सग्गं छट्ठं अट्ठम अविरदपसुत्तबोधम्हि ॥ ३६ ॥**

भाषमाणयोः मध्ये यः ब्रवीति पूर्वच्छिन्नदोषं च ।
कायोत्सर्गं षष्ठं अष्टमं अविरतप्रसुप्तबोधे ॥

**अस्या अर्थः**—गोष्ठिजनमध्ये गतच्छिन्नदोषेषु आत्मप्रतिष्ठां कर्तुं ब्रूते एकवारामयं कायोत्सर्गेण शुद्ध्यति । एकें दोसु विचक्खया अवरु जो आपणा बोलइ तस्स छट्ठं । णिंदा करतु बोलइ तस्स अट्ठमं । अप्रतिबोधविरोधवचनं परोपतापाहिंसावचनं बोले महात्रिरात्रम् ॥

**छकम्मदेसयरणे उववासो अट्ठमं च गीदादी ।**
**चाउव्वण्णवराधे गण ( दो ) णिग्घाडणं होइ ॥ ३७ ॥**

षट्कर्मदेशकरणे उपवासः अष्टमं च गीतादेः ।
चतुर्वर्णापराधे गणतो निर्घाटनं भवति ॥

**अस्या अर्थः**—गृहस्थषट्कर्मोपदेशके उपवासमेकं । गीतं वाद्यं नृत्यं स्वयं करोति अष्टमं । चातुर्वर्ण्यस्यापराधं वदति स निर्घाटनीयो भवति—परगणे प्रेषणीय इति ॥

भाषासमितिः

---

**अण्णाणवाहिदप्पे भक्खणं कंदादि एकबहुवारं ।**
**काउस्सग्गुववासा खवणं पणगं च मूलगुणं ॥ ३८ ॥**

अज्ञानव्याधिदर्पैः भक्षणं कन्दादेः एकबहुवारं ।
कायोत्सर्गोपवासौ क्षमणं पंचकं च मूलगुणं ॥

**अस्या अर्थः**—अज्ञानत्वेन कन्दादिभक्षणं करोति एकवारं कायोत्सर्गं । बहुवारायां उपवासमेकं । व्याधिग्रस्ते एकवारायां उपवासमेकं । बहुवारायां खादति तदा कल्याणमेकं । अथ प्रमत्तो भूत्वा हरितकंदादिकं ज्ञात्वा भक्षयति तस्य पंचकल्याणं । अथ दर्पेण वर्षानुवर्षं खादति तस्य ( स ) मूलस्थानं याति ॥

**णिट्ठवणं भणिय भुत्ते वंसालंवे य कुड्डढक्कस्स ।**
**चउरंगुलठिदिरहिदे खवणगिलाणे य छट्ठ ससेसु ॥ ३९ ॥**

निष्ठीवनं भणित्वा भुक्ते वंशालंबेन च कुड्यावष्टंभस्य ।
चतुरंगुलस्थितिरहिते क्षमणं ग्लाने च षष्ठं शेषेषु ॥

**अस्या अर्थः**—व्याधिग्रस्तो निष्ठीवनं करोति । कुड्यावष्टंभं करोति । पादान्तरं चतुरंगुलं लंघयति तदा उपवासमेकं । अथ आरोग्यः दर्पेण करोति तदा षष्ठं भवति ॥

**कागादिअंतराए उववासो गहियउग्गहे भग्गे ।**
**जादे विवेगंकरणं सव्वं भुत्तस्स खमणं खु ॥ ४० ॥**

कागाद्यन्तराये उपवासः गृहीतावग्रहे भग्ने ।
जाते विवेककरणं सर्वं भुक्तस्य क्षमणं खलु ॥

**अस्या अर्थः**—भोजनमकुर्वन् अ······तं शरीरे ल······कादिविष्टं दृष्टं भुक्ते तदा उपवासः । अवग्रहं ज्ञात्वा भग्ने सति अन्तरायः कर्तव्यः । अथ न स्मरते भुक्तं तदा उपवासः ॥

**वड्डंतरायजादे सुदं पि भोत्तस्स होदि खमणं तु ।**
**सय भुंजमाण दिट्ठे छट्ठट्ठम मुहे य पडिकमणं ॥ ४१ ॥**

वृहदन्तरायजाते श्रुतेऽपि भोक्तुः भवति क्षमणं तु ।
स्वयं भुज्यमाने दृष्टे षष्ठं अष्टमं मुखे च प्रातिक्रमणं ॥

**अस्या अर्थः**—बृहदन्तरायजाते गृहे भुक्तानन्तरं श्रुते तदा प्रतिक्रमणपूर्वकमुपवासं । स्वहस्ते दृष्टे षष्ठं । स्वमुखोपलब्धेऽष्टमं प्रतिक्रमणपूर्वकम् ॥

**सज्झायरहियकाले गामंतरगमण गोयरग्गं च ।**
**काउस्सग्गुववासो जहाकमं होइ मलहरणं ॥ ४२ ॥**

स्वाध्यायरहितकाले ग्रामान्तरगमनं गोचरगं च ।
कायोत्सर्गोपवासौ यथाक्रमं भवति मलहरणं ॥

**अस्या अर्थः**—पूर्वाह्णे त्रिघटिकास्वाध्याये कायोत्सर्गं । एकग्रामे देववन्दनां कृत्वा अपरग्रामे भुक्ते तदा उपवासः ॥

**आधाकम्मे भुत्ते गिलाण णीरोय इक्कबहुवारे ।**
**उववास छट्ठ मासिय मूलं पि य होइ मलहरणं ॥ ४३ ॥**

---

१ त्यागः तद्भोजनपरिहार एव प्रायश्चित्तं ।

आधाकर्माणि भुक्ते ग्लानः नीरोगः एकबहुवारे ।
उपवासः षष्ठं मासिकं मूलमपि च भवति मलहरणं ॥

**अस्या अर्थः**—व्याधिग्रस्तः आधाकर्माणि भुक्ते तस्योपवासः । अथ बहुवारायां षष्ठं । अथ आरोग्यस्य पंचकल्याणं । बहुवारायां भुक्ते स मूलस्थानीभवति ॥

एषणासमितिः ।

---

**कट्ठादिवियडिचालण ठाणादो वा खिवेज्ज अण्णत्तं ।**
**काउस्सग्गं पाइय चक्खूविसयह्मि उववासो ॥ ४४ ॥**

काष्ठादिवियडिचालनं स्थानतो वा क्षिपेदन्यत्र ।
कायोत्सर्गं प्राप्नोति अचक्षुविषये उपवासः ॥

**अस्या अर्थः**—काष्ठादिवियडि अन्यत्र स्थितः अन्यत्र स्थापिते कायोत्सर्गं । अथातो वियर्डि पृथक्कृत्वा रात्रौ स्थापितः उपवासमेकं । अन्धकारे विशेषतः ॥

आदाननिक्षेपणासमितिः ।

---

**हरियादिबीज उवरिं उच्चाराई करेइ राइम्हि ।**
**थोवे काउस्सग्गो उववासो जाण बहुवारे ॥ ४५ ॥**

हरितादिबीजानां उपरि उच्चारादिकं करोति रात्रौ ।
स्तोके कायोत्सर्गं उपवासं जानीहि बहुवारे ॥

**अस्या अर्थः**—रात्रौ हरितकायोपरि वोसरणे कायोत्सर्गं । तदेव बहुवारान् उपवासम् ॥

प्रतिष्ठापनासमितिः ।

---

**परिसरसघाणचक्खूसोदादिचारे पयत्तइयरस्स ।**
**काउस्सग्गुववासा एगुत्तरवड्ढिया कमसो ॥ ४६ ॥**

स्पर्शरसघ्राणचक्षुःश्रोत्रातिचारे प्रयत्नेतरयोः ।
कायोत्सर्गोपवासा एकोत्तरवर्द्धिताः क्रमशः ॥

**अस्या अर्थः**—प्रयत्नाचारस्य मुनेः कायस्पर्शस्योपरिचित्ताभिलाषेकायोत्सर्ग एकः । रसस्योपरि चित्ताभिलाषे कायोत्सर्गौ २ ( द्वौ ) । घ्राणस्पृहाभिलाषे कायोत्सर्गाः ३ ( त्रयः ) । चक्षुः स्पृहायां कायोत्सर्गाः ४ ( चत्वारः ) । श्रोत्रस्पृहायां कायोत्सर्गाः ५ ( पंच ) । अथ अप्रयत्नचारिणः एकवारं चित्तोत्कोचे उपवासः १ ( एकः ) । तथा तेन क्रमेण जिव्हाघ्राणचक्षुःश्रवणानां एकवारचित्तोत्कोचे जाते सति उपवासमेकमिति एकैकोत्तरवृद्धया ॥

इन्द्रियनिरोधम् ।

---

**वंदणणियमविरहिदे उववासो होइ कालछिण्णे य ।**
**तह सज्झायचउक्के काउसग्गो अवेलाए ॥ ४७ ॥**

वन्दनानियमरहिते उपवासो भवति कालछिन्ने च ।
तथा स्वाध्यायचतुष्के कायोत्सर्गः अवेलायां ॥

**अस्या अर्थः**—वन्दनया विना उपवासः । पूर्वाह्णे देववन्दनां त्रीणि घटिका यावान् युक्तं । अपराह्णे घटिकां चत्वारि यावान् वन्दना । मध्यान्हे घटिकाद्वयं वन्दना स्वाध्यायचत्वारि न कुर्वंति सति उपवासः । अवेलायां गृहीते सति कायोत्सर्गम् ॥

**आवासयपरिहीणो अद्धं इक्कं च चउरमासाणि ।**
**खवणं पण संठाणं मूलह्मि य होइ वासह्मि ॥ ४८ ॥**

आवश्यकपरिहीनः अर्द्धं एकं च चतुर्मासान् ।
क्षमणं पचकं संस्थानं मूले च भवति वर्षे ॥

**अस्या अर्थः**—षडावश्यक एक दिसन्न जइ न होइ उववासु होइ । मासमेकं कल्याणं । मासचउण्हं पंचकल्याणं । नियम न करत उपवासु । वर्षमेकं नियमं न भवति षडावश्यकं वशाते च्च मूलं जाते निय (म) सहैव वंदना । वेलातिक्रमो भवति तदुपवासं ॥

**तिहि अदिकंते पक्खे चाउम्मासे य जाम वासो य ।**
**सो छट्ठावण छेदो णादूण य होदि कायव्वं ॥ ४९ ॥**

त्रिषु अतिक्रान्तेषु पक्षेषु चतुर्मासेषु च यावत् वर्षं च ।
स षष्ठं उपस्थापनं छेदो ज्ञात्वा च भवति कर्तव्यम् ॥

**अस्या अर्थः**—त्रिपक्षे अथ मासदिवसहं अथवा वर्षदिवसहं प्रतिक्रमणं न भवति तदा मूलं याति। चातुर्मासे पंच प्रतिक्रमणा न भवन्ति द्विगुणमुपवासा भवन्ति ॥

आवश्यकशुद्धिः ।

---

**चाउम्मासियवरिसिगजुयंतरे लोच चेव अदिचारे ।**
**उववास छट्ठ मासिय गिलाणइयरेण अणुग्घादं ॥ ५० ॥**

चातुर्मासिकवार्षिकयुगान्तरे लोचे चैवातिचारे ।
उपवासः षष्ठं मासिकं ग्लानेतरेण अनुद्घाटं ॥

**अस्या अर्थः**—लोचे चातुर्मासिकेऽतिक्रमे तदा उपवासमेकं। संवत्सरे तु यदा न भवति तदा षष्ठोपवासः भवति। पंचवर्षे पंचकल्याणं। निर्व्याधितस्तु निरन्तरं करोति ॥

लोचः ।

---

**उवसग्गवाहिकारणदप्पेणाचेलभंगकरणह्मि ।**
**उववासो छट्ठ मासिय कमेण मूलं तदो इसइ ॥ ५१ ॥**

उपसर्गव्याधिकारणदर्पेण अचेलभंगकरणे ।
उपवासः षष्ठं मासिकं क्रमेण मूलं ततः इच्छति ॥

**अस्या अर्थः**—उपसर्गभयेन वस्त्रपरिधानं करोति तदोपवासः। व्याधेः वस्त्रपरिधानं करोति तदा षष्ठमुपवासं। केनचित्कारणेन रागबुद्धिः पंचकल्याणं। दर्पेण परिधानं मूलं याति। अथ प्रियाभिलाषे परिधानं तदा मूलं याति॥

अचेलकम्।

---

**दंतवणण्हाणभंगे गिहत्थसिज्जा सराइए सुत्ते।**
**एक्के वारे पणयं बहुवारे पंचकल्लाणं॥ ५२॥**

दन्तमनस्नानभंगे गृहस्थशय्यायां सरागेण सुप्ते।
एकस्मिन् वारे पंचकं बहुवारे पंचकल्याणं॥

**अस्या अर्थः**—मृदुशयनमवलोक्य क्षितिशयनं न करोति एकवारे कल्याणं। बहुवारायां पंचकल्याणं॥

अस्नानक्षितिशयनदन्तधावनानि।

---

**अट्ठियअणेयभुत्ते पमाददप्पम्हि इक्कबहुवारे।**
**पणगं मासिय छेदो मूलं च कमेण जणणादे॥ ५३॥**

अस्थितानेकभुक्ते प्रमाददर्पे एकबहुवारे।
पंचकं मासिकं छेदो मूलं च क्रमेण जनज्ञाते॥

**अस्या अर्थः**—स्थितिभोजनैकभोजनभंगे एकवारायां प्रमादे कल्याणं। बहुवारं प्रमादे पंचकल्याणं। एकभक्तं भग्नं दर्पे बहुवारे मूलं याति। चशब्दाज्जनेन ज्ञाते मोहेन भुक्ते मूलं याति॥

स्थितिभोजनैकभक्ते।

---

**समिदिंदियखिदिसयणे लोचे दंतवण संकिलेसाणं।**
**काउस्सग्गुववासा बहुवारे मूलमिदराणं॥ ५४॥**

समितीन्द्रियक्षितिशयने लोचे दन्तमने संक्लेशानाम् ।
कायोत्सर्गोपवासौ बहुवारे मूलमितरेषाम् ॥

**अस्या अर्थः**—एकवारे प्रमादे कृते कायोत्सर्गं । बहुवारायां उपवासं ॥

मूलगुणाः ।

---

**अब्भोवगासठाणादिगा य अथिरा हु दुविह आदाव ।**
**अत्तोरणतरुमूलं थिरजोगा होंति णायव्वा ॥ ५५ ॥**

अभ्रावकाशस्थानादिकाश्च अस्थिरा हि द्विविध आतापः ।
अतोरणतरुमूलौ स्थिरयोगौ भवतः ज्ञातव्यौ ॥

**अस्या अर्थः**—अभ्रावकाशस्थानमौनवीरासनानि चत्वारि चलयोगाः । आतापनः स्थिरोऽस्थिरश्च । अतोरणयोगस्तरुमूलयोगौ एतौ स्थिरौ ॥

**थिरजोगाणं भंगे वाहिपडिकारकण्णजावट्ठं ।**
**जे दिवहा ते खमणा पइण्णभग्गाण इयराणं ॥ ५६ ॥**

स्थिरयोगानां भंगे व्याधिप्रतीकारकरणजापार्थम् ।
यावन्ति दिवसानि तावन्ति क्षमणानि प्रतिज्ञाभग्नानां इतरेषाम् ॥

**अस्या अर्थः**—स्थिरयोगभंगे आगन्तुकदिनानि उपोषितव्यानि । अस्थिरयोगप्रतिज्ञाभंगे तेन च क्रमेण उपवासाः, परं किन्तु प्रतिक्रमणपूर्वकं स्थितिः ॥

**सप्पडिकमणं मासिय तच्चुववासा तहेव लहुमासं ।**
**पढमे पक्खे मज्झिम पच्छिमपक्खे य जोगवहे ॥ ५७ ॥**

सप्रतिक्रमणं मासिकं तावन्त उपवासाः तथैव लघुमासः ।
प्रथमे पक्षे मध्यमे पश्चिमपक्षे च योगवधे ॥

**अस्या अर्थः**—प्रथमे पक्षे योगहते प्रतिक्रमणपूर्वकं पंचकल्याणं । मध्यमे पक्षे योगभंगे सति आगामीयदिवसा भवन्ति तत्प्रमाणा उपवासाः कर्तव्याः । अन्तिमपक्षे योगभंगे सति लघुकल्याणम् ॥

उत्तरगुणाः ।

---

**अप्पासुगे वसंतो सइं बहुवारे य मोहहंकारे ।**
**उववास पणय मासिय सोवट्ठाणं च जाण मूलं तु ॥ ५८ ॥**

अप्रासुके वसन् सकृत् बहुवारे च मोहाहंकाराभ्यां ।
उपवासं पंचकं मासिकं सोपस्थानं च जानीहि मूलं तु ॥

**अस्या अर्थः**—अप्रासुकस्थाने स्थिते सति प्रतिक्रमणपूर्वकं उपवासः । बहुवारे स्थिते सति पंचकल्याणं । अहंकारात् स्थिते सति मूलस्थानं याति ॥

**गामादिओसयाणं अजाणमाणो करेइ उवएसं ।**
**जाणंवो धम्मट्टं पण मासिय मूल गारवि वि ॥ ५९ ॥**

ग्रामाद्याश्रितानां अजानानः करोति उपदेशं ।
जानानः धर्मार्थं पंचकं मासिकं मूलं गर्वेऽपि ॥

**अस्या अर्थः**—अजानमानो ग्रामाश्रयजनस्य उपदेशे दीयमाने प्रतिक्रमणसहितं पंचकल्याणं । आगमं धर्मार्थं······तस्य बहुवारमुपदिशति तदा प्रतिक्रमणसहितं पंचकल्याणं । गारवे बहुवारे उपदेशे मूलस्थानम् ॥

**आलोयण तणुसग्गो अयाणमाणस्स पूयउवएसे ।**
**सइं बहुवारे सुज्झदि उववासे पणय पडिकमणे ॥ ६० ॥**

आलोचना तनूत्सर्गः अजानानस्य पूजोपदेशे ।
सकृत् बहुवारे शुद्ध्यति उपवासेन पंचकेन प्रतिक्रमणेन ॥

**अस्या अर्थः**—अजानतः स्तोकदेवार्चने हि उपदेसु देइ वि पूजाकरावता आलोचयित्वा कायोत्सर्गेण शुद्ध्यति । तथा च अज्ञानवत्वेन बहुवारायां स्तोकपूजा उपवासु । बृहत्पूजोपदेशे प्रतिक्रमणपूर्वकं कल्याणम् ॥

**जाणंतस्स विसोही पूयाकरणह्मि इक्कबहुवारे ।**
**मासं मासिय बहुसो वधकरणे थूलपडिकमणं ॥ ६१ ॥**

जानानस्य विशुद्धिः पूजाकरणे एकबहुवारे ।
मासं मासिकं बहुशः वधकरणे स्थूलप्रतिक्रमणं ॥

**अस्या अर्थः**—आगमु जाणवि पूजोपदेशं दीयमाने कल्याणं । अर्चनविधि बहुवारे आगमं ज्ञाते सति पंचकल्याणं । आत्मनः सन्निधाने स्थित्वा हिंसादिधर्मोपदेशनं करोति बृहदर्चनहिंसा मूलस्थानम् ॥

**इति रिया जावकालिय समणे भुत्तो पि एइ युंजेइ ।**
**अण्णाहे उववासो मासिय पडिक्रमण जणणादे ॥ ६२ ॥**

........................................ ।
अज्ञाते उपवासः मासिकं प्रतिक्रमणं जनज्ञाते ॥

**अस्या अर्थः**—नयनव्यथया जाते उपवासु । अदृश्यमाने व्यथाऽसक्ते सति उपवासु । जनपदेन ज्ञाते भयास्थितिधावमानेन वा उपवासं । तदेव भुंजाने बहुवारायां प्रतिक्रमणपूर्वकं कल्याणम् ॥

**वददंसणा दु भट्ठे संभोगी जो मुहादिसंठप्पे ? ।**
**अरुहादिअवण्णेण य पावइ उववास पडिकमणं ॥ ६३ ॥**

व्रतदर्शनात्तु भ्रष्टेन संभोगी यः मुखादि संस्थिते । ?
अर्हदाद्यवर्णेन च प्राप्नोति उपवासं प्रतिक्रमणं ॥

**अस्या अर्थः**—व्रतदर्शनभ्रष्टपुरुषेण सह सांगत्यदोषेण आगमविरुद्धवचनं ब्रूते । आगमु धम्मु देउ निंदे ( आगमधर्मदेवनिन्दायां ) पंचपरमेष्ठिप्रतिकूलपुरुषाणां सह संगः धर्मेण दोषस्य प्रतिक्रमणपूर्वकमुपवासम् ॥

**विज्जामंतेचोज्जं अट्ठंगणिमित्तमूलचुण्णाणि ।**
**जो कुणइ मोख णियमा पावइ उववास पडिकमणं ॥ ६४ ॥**

विद्यामंत्रातोद्याष्टाङ्गनिमित्तमूलचूर्णानि ।
यः करोति........नियमात् प्राप्नोति उपवासं प्रतिक्रमणं ॥

**अस्या अर्थः**—विद्योपजीवकमंत्रवाद्यष्टाङ्गनिमित्तोपजीविवशीकरणचूर्णस्नानपांनाद्युपजीवकेन सह सांगत्ये प्रतिक्रमणपूर्वकमुपवासम् ॥

**सुत्तत्थचोरियाए गिण्हंतो विणयपुच्छरहिओ य ।**
**आलोयण तणुसग्गो पावइ दिंतो वि एमेव ॥ ६५ ॥**

सूत्रार्थ चुर्या गृह्णन् विनयपृच्छारहितश्च ।
आलोचनां तनुसर्गं प्राप्नोति ददद्पि एवमेव ॥

**अस्या अर्थः**—सूत्रार्थु आगमु चोरिया वंचन ( नां ) यो जानाति । अथाविनयेन पृच्छति तत्रालोचनकायोत्सर्गम् ॥

**सुत्तत्थं देसंतो सोदारे जो कुणेहिं असमाहिं ।**
**पावइ चउत्थ छेदो णिण्हवकारो य सुयगुरुणो ॥ ६६ ॥**

सूत्रार्थं देशयन् श्रोतरि यः करोति असमाधिं ।
प्राप्नोति चतुर्थं छेदं निन्हवकारश्च श्रुतगुरूणां ॥

**अस्या अर्थः**—आगमुसूत्रार्थदेसु ( आगमसूत्रार्थदेशकः ) अनालोचनः कथयति श्रोतॄणां परिणामभंगे करोति श्रुतगुरुं न मन्यते तस्योपवासम् ॥

**मासं पडि उववासो चाउम्मासे य तहेव अट्ठ चत्तारि ।**
**संवच्छरिये बारस कायव्वा णिज्जरट्ठाए ॥ ६७ ॥**

मासं प्रत्युपवासः चतुर्मासे च तथैव अष्टौ चत्वारः ।
संवत्सरे द्वादश कर्तव्या निर्जरार्थिना ॥

**अस्या अर्थः**—आषाढमाससंवत्सरिके उपवासा द्वादश । कार्तिकचतुर्मासे अष्ट । फाल्गुनचतुर्मासे चत्वारि ॥

**संथारमसोहंतो पयदापयदेसु खवण पणगं च ।**
**काउस्सग्गुववासो सुद्धासुद्धम्हि णावाए ॥ ६८ ॥**

संस्तरमशोधयतः प्रयत्नाप्रयत्नयोः क्षमणं पंचकं च ।
कायोत्सर्गोपवासः शुद्धाशुद्धायां नावायां ॥

**अस्या अर्थः**—प्रयत्नाचारस्य संस्तरकमशोधयतः तस्योपवासं । अप्रयत्नाचारस्य कल्याणं । मूलं न देंतस्स नावडा संबोधयित्वा नदीमुत्तरति नावायां नियमेन शुद्ध्यति ॥

**अयउवयरणे णट्ठे जावदिया अंगुलानि तावदिया ।**
**उववासा कायव्वा वदंति घणअंगुला केई ॥ ६९ ॥**

अय-उपकरणे नष्टे यावन्ति अंगुलानि तावन्तः ।
उपवासाः कर्तव्याः वदन्ति घनाङ्गुलानि केचित् ॥

**अस्या अर्थः**—लोहोपकरणे नष्टे सति यावन्ति अंगुलानि भवन्ति तावन्त उपवासाः । अपरे केचिदाचार्या घनचतुरस्राङ्गुलमानेनोपवासाः ॥

**सेसुवयरणे णट्ठे काउस्सग्गो जिणेहि णिद्दिट्ठो ।**
**रूवादिघादणम्हि य यमेण दुप्परिणामकरणेण ॥ ७० ॥**

शेषोपकरणे नष्टे कायोत्सर्गो जिनैः निर्दिष्टः ।
रूपादिघातने च यमेन दुष्परिणामकरणेन ॥

**अस्या अर्थः**—शेषोपकरणे नष्टे सति कायोत्सर्गः, उपकरणे भग्ने सति अपरे किंचित्कृतं तस्य दोषं ज्ञात्वा कायोत्सर्गं । एकवारकपाटे आकर्षिते नियमेन शुद्ध्यति ॥

चुलिका ।

---

**जह सवजाणं भणियं सवणीणं तह य होइ मलहरणं ।**
**वज्जिय तियालजोयं दिणपडिमं छेदमूलं च ॥ ७१ ॥**

यथा श्रमणानां भणितं श्रमणीनां तथा च भवति मलहरणं ।
वर्जयित्वा त्रिकालयोगं दिनप्रतिमां छेदमूलं च ॥

**अस्या अर्थः**—यत्प्रायश्चित्तं ऋषीणां यथा तेन विधिना आर्यिकाणां दातव्यं परं किन्तु त्रिकालयोगं सूर्यप्रतिमा न भवति । उत्तरगुणानां सामाचारो न भवति । केन कारणेन मूलच्छेदे जाते सति उपस्थापनायां न याति ॥

**सामाचारो कहिओ अज्जाणं चेह जो विसेसो दु ।**
**तस्स य भंगेण पुणो गणिणा कुसलेण णिद्दिट्ठं ॥ ७२ ॥**

सामाचारः कथितः आर्याणां चेह यो विशेषस्तु ।
तस्य च भंगेन पुनः गणिना कुशलेन निर्दिष्टम् ॥

**अस्या अर्थः**—ऋषीणां आर्यिकाणां च सामाचारो न ज्ञायते । तथा च प्रायश्चित्तं कथनीयम् ॥

**थिरअथिरा अज्जाए पमाददप्पेहिं इक्कबहुवारे ।**
**तणुसय खमणं खमणं पणगं पणगं च छट्ठ मूलगुणं ॥ ७३ ॥**

स्थिरास्थिरार्यायां प्रमाददर्पाभ्यां एकबहुवारे ।
तनुसर्गः क्षमणं क्षमणं पंचकं पंचकं च षष्ठं मूलगुणं ॥

**अस्या अर्थः**—सामाचारो अ······अ······ अ······ य हि स्थिरचारिकाणां व्युत्सर्गमेकवारे प्रमादचारिणीनां च बहुवारम्मि उपवासं । अथिरचारिणीनां बहुवारायां कल्याणं । अथिरचारिणीनां प्रमादेन षष्ठं । तेषां बहुवारायां दर्पेण पंचकल्याणं । अनेन प्रकारेण विधिना । ऋषीणां तथैव च ।

**अज्जाण चेलधुवणे उववासो आउकायवायम्मि ।**
**काउस्सग्गो कहिओ फासुयणीरेण पत्ताइं ॥ ७४ ॥**

आर्याणां चेलधावने उपवासः अप्कायवाते ।
कायोत्सर्गः कायेतः प्रासुकनीरेण पात्रादेः ॥

**अस्या अर्थः**—आर्यिकानां शीततोयेन युगाधौते उपवासं । कंथा गोणी वस्त्रयुग एषां प्रत्येकतः उष्णजले प्रक्षालिते कायोत्सर्गम् ॥

**मट्टियजलप्पमाणं णाडुं कुड्डादिलेवकरणाए ।**
**दायव्वा विरदीणं काउस्सग्गादिमासंतं ॥ ७५ ॥**

मृत्तिकाजलप्रमाणं ज्ञात्वा कुड्यादिलेपकरणे ।
दातव्यं विरतीनां कायोत्सर्गादिमासान्तम् ॥

**अस्या अर्थः**—अस्पृष्टा दोषदर्शनदिवसात् दिवसचतुष्टयं यावत् आयम्बिल-निव्वियडीपुरिमंडलोपवासः कर्तव्यः ॥

**आवसयापि मोणेण चेव तिस्से सदा समुद्दिट्ठा ।**
**वदरोहणं पि पच्छा कायव्वं गुरुसयासम्मि ॥ ७६ ॥**

आवश्यकान्यपि मौनेन चैव तस्याः सदा समुद्दिष्टानि ।
व्रतारोपणमपि पश्चात् कर्तव्यं गुरुसकाशे ॥

**अस्या अर्थः**—पुष्पं दृष्ट्वा षडावश्यकक्रिया मौनेन कर्तव्या । पश्चात् गुरूणां सान्निधौ व्रतारोपणम् ॥

**तिविहं च होइ ण्हाणं तोएण वदेण मंतसंजुत्तं ।**
**तोएण गिहत्थाणं मंतेण वदेण साहूणं ॥ ७७ ॥**

त्रिविधं च भवति स्नानं तोयेन व्रतेन मंत्रसंयुक्तं ।
तोयेन गृहस्थानां मंत्रेण व्रतेन साधूनाम् ॥

आर्याणां विशेषप्रायश्चित्तम् ।

---

**जं सवणाणं भणियं पायच्छित्तं पि सावयाणं पि ।**
**दोण्हं तिण्हं छण्हं अद्धद्धकमेण दायव्वं ॥ ७८ ॥**

यत् श्रमणानां भणितं प्रायश्चित्तं अपि श्रावकानामपि ।
द्वयोः त्रयाणां षण्णां अर्धार्धक्रमेण दातव्यं ॥

**अस्या अर्थः**—ऋषीणां यत्प्रायश्चित्तं तच्छ्रावकाणामपि भवति । परं किन्तु उत्तमश्रावकाणां ऋषेः प्रायश्चित्तस्य अर्द्धं । तस्यार्धं ब्रह्मचारिणां–तदर्धं मध्यमश्रावकस्य प्रायश्चित्तं । तदर्धं जघन्यश्रावकस्य प्रायश्चित्तं ॥

**केई पुण आयरिया विसेससुद्धिं कहंति तिण्हं पि ।**
**वियतियचउत्थभायं गहिऊण य होइ दायव्वं ॥ ७९ ॥**

केचित्पुन आचार्याः विशेषशुद्धिं कथयन्ति त्रयाणामपि ।
द्विकत्रिकचतुर्थभागं गृहीत्वा च भवति दातव्यं ॥

**अस्या अर्थः**—ऋषीणां प्रायश्चित्तस्य उत्तमश्रावकस्य द्विभागं प्रायश्चित्तं । ब्रह्मचारिणां ऋषीणां प्रायश्चित्तस्य त्रिभागो दातव्यः । ऋषीणां प्रायश्चित्तस्य चतुर्थभागः श्रावकस्य दातव्यः ॥

**छण्हं पि सावयाणं पंचमहापातकं पमादेसु ।**
**जिणमाहिमा वि य भणिया विसेससोही जिणवरेहि ॥ ८० ॥**

षण्णामपि श्रावकाणां पंचमहापातकं प्रमादेषु ।
जिनमहिमापि च भणिता विशेषशुद्धिः जिनवरैः ॥

**अस्या अर्थः**—पंचमहापातकं प्रति प्रायश्चित्तोपरि जिनपूजाविशेषशुद्ध्यर्थाय गाथा ॥

**तेसिं विसेससोही महुमंसमज्जभक्खिदे दप्पे ।**
**बारस खवणाणि पुणो छट्ठं खु प्रमादचारिस्स ॥ ८१ ॥**

तेषां विशेषशुद्धिः मधुमांसमद्यभक्षिते दर्पेण ।
द्वादश क्षमणानि पुनः षष्ठं खलु प्रमादचारिणः ॥

**अस्या अर्थः**—प्रायश्चित्तजनानां षण्णां मधुमांसमद्यभक्षिते सति दर्पेण उपवास-द्वादशप्रायश्चित्तं । प्रमादवशे षष्ठं प्रायश्चित्तं ॥

**मुत्तपुरीसे रेदे अभक्खभक्खम्मि होइ तह चेव ।**
**पंचुंबरादिभक्खे पमादचारीण उववासो ॥ ८२ ॥**

मूत्रपुरीषे रेतसि अभक्ष्यभक्षे भवति तथा चैव ।
पंचोम्बरादिभक्षे प्रमादचारिणां उपवासः ॥

**अस्या अर्थः**—दर्पेण मूत्रपुरीषरेतोभक्षणे सति उपवासा द्वादश । प्रमादे सति षष्ठं । अथ क्षीरवृक्षाणां पंचोदुम्बरफलानि भक्षमाणे प्रमादे उपवासमेकं । दर्पेण भक्षिते षष्ठं ॥

**गोघादवंदिगहणे अवलंबियमडय पिट्ठ किमिदट्ठे ।**
**छह उववासा कहिया कारुयचंडालअण्णपाणेण ॥ ८३ ॥**

गोघातवन्दिग्रहणेन अवलंबितमृतस्य स्पृष्टं कृमिदष्टे ।
षडुपवासाः कथिताः कारुकचांडालान्नपानेन ॥

**अस्या अर्थः**—गोघातेन मृतस्य । अथ धृतेन मारित (मृतस्य)। अथ बद्धेन मृतः। मृतकस्य कृमि देहे जाते कुहियलिंगशरीरे उपवासाः षड् भवन्ति । कारुकगृह-चाण्डालखाने पाने उपवासाः षड् भवन्ति । अथ तैः सह संस्पृष्टे उपवासाः षट् ॥

**मादसुदादिसजोणी चंडालीणं च जो ( य ) गच्छंतो ।**
**बत्तीसा उववासा दायव्वा सोहणट्ठाए ॥ ८४ ॥**

मातृसुतादिस्वयोनीः चांडालीश्च यः गच्छन् ।
द्वात्रिंशदुपवासाः दातव्याः शोधनार्थम् ॥

**अस्या अर्थः**—माता दुहिता चाण्डालिका ताभिः सह गमनं स्वप्ने तदा प्रायश्चित्तं द्वात्रिंशदुपवासाः ॥

**कारुयपत्तम्मि पुणो भुत्ते पीदे वि तत्थ मलहरणं ।**
**पंचुववासा णियमा णिद्दिट्ठा छेदकुसलेहिं ॥ ८५ ॥**

कारुकपात्रे पुनः भुक्ते पीतेऽपि तत्र मलहरणं ।
पंचोपवासा नियमात् निर्दिष्टाः छेदकुशलैः ॥

**अस्या अर्थः**—कारुणां गृहे यदा खानं पानं तदा पंचोपवासा भवन्ति ॥

**लोइयसूरत्तविही जलाइपरदेसवालसण्णासे ।**
**मरिदे खणे ण सोही वद सहिदे चेव सागारे ॥ ८६ ॥**

लौकिकशूरत्वविधिना जलादिपरदेशबालसन्यासेन ।
मृते क्षणे न शुद्धिः व्रतसाहिते चैव सागारे ॥

**अस्या अर्थः**—लौकिकशौर्येण मृते, पानीये नावादिप्रविष्टेन मृते, प्रवासेन मृते, बालमरणेन मृते, संन्यासेन मृते, व्रतसहिते श्रावके मृते सूतकं नेति ॥

**पण दस बारस णियमा पण्णरसएहिं तत्थ दिवसेहिं ।**
**खत्तियबंभणवइसा सुद्दाइ कमेण सुज्झंति ॥ ८७ ॥**

पंचभिः दशभिः द्वादशभिः नियमात् पंचदशभिः तत्र दिवसैः ।
क्षत्रियब्राह्मणवैश्याः शूद्राः क्रमेण शुद्ध्यन्ति ॥

**काऊण य जिणपूया अहिसेवा तेण तस्स ण्हाणं च ।**
**उवयरणवत्थपुव्वं दायव्वं चउव्विहं दाणं ॥ ८८ ॥**

कृत्वा च जिनपूजां अभिषेकं तेन तस्य स्नानं च ।
उपकरणवस्त्रपूर्वं दातव्यं चतुर्विधं दानं ॥

**अस्या अर्थः**—प्रायश्चित्तानन्तरं जिनपूजाभिषेकाः ततस्तेनैव जिनस्नानोदकेन आत्मस्नानं करणीयं । ततस्तु उपकरणवस्त्रचतुर्विधं दानं देयमिति ॥

**तह य सुवण्णादीणं दायव्वं इच्छियाण जहजोग्गं ।**
**सिरमुंडणं च कुज्जा लोयाण य चित्तगहणट्ठं ॥ ८९ ॥**

तथा च सुवर्णादीनां दातव्यं इच्छितानां यथायोग्यं ।
शिरोमुंडनं च कुर्यात् लोकानां च चित्तग्रहणार्थं ॥

**जावदिया परिणामा तावदिया हौंति तत्थ अवराहा ।**
**पायच्छित्तं सक्कइ दादुं कादुं च को समए ॥ ९० ॥**

यावन्तः परिणामा तावन्तो भवन्ति तत्रापराधाः ।
प्रायश्चित्तं शक्नोति दातुं कर्तुं च कः समये ॥

**अणुकंपा कहणेण य विरामवद्सहण···उवओगे ।**
**पादद्धतयं सव्वं पावइ कज्जं ण संदेहो ॥ ९१ ॥**

अनुकम्पाकथनेन च·································उपयोगे ।
पादार्धत्रयं सर्वं प्राप्नोति कार्यं न सन्देहः ॥

**अस्या अर्थः**—अनुकम्पा सचतुर्भागापहारो भवति । गुरुसकाशात् प्रकटीकृत्य श्रुतमात्रादेव सद्योऽर्धं तस्य नश्यति, पुरुषवदात्रिदोषात्रिभागं नश्यति । व्रतारोहणी गृहीत्वा प्रकर्षचारेण सर्वदोषाद्विरतिः ॥

**पुव्वायरियकयाणि य आलोचित्ता मया समुद्दिट्ठा ।**
**जं आगमे विरुद्धं अवणिय पूरंतु छेदण्हू ॥ ९२ ॥**

पूर्वाचार्यकृतानि च आलोच्य मया समुद्दिष्टानि ।
यदागमेन विरुद्धं अपनीय पूर्यन्तु छेदज्ञाः ॥

**एवं पायच्छित्तं चाउव्वण्णस्स सोहणट्ठाए ।**
**वुच्चइ छेदाणउदी णउदिगाहाहि णिद्दिट्ठं ॥ ९३ ॥**

एवं प्रायश्चित्तं चतुर्वर्णस्य शोधनार्थम् ।
वक्ति छेदनवतिः नवतिगाथाभिः निर्दिष्टम् ॥

**भविया जं अल्लीणा संसारमहोवहिं समुत्तारिदुं ।**
**गच्छंति सिद्धिखेत्तं णंदउ जिणसासणं सुइरं ॥ ९४ ॥**

भव्याः यदाश्रिताः संसारमहोदधिं समुत्तीर्य ।
गच्छन्ति सिद्धिक्षेत्रं नन्दतु जिनशासनं सुचिरं ॥

इति नवतिवृत्तिः समाप्ता ।

# श्रीगुरुदास-विरचिता
# प्रायश्चित्त-चूलिका ।

## श्रीनन्दिगुरुकृत-विवरणसहिता ।

**प्रणम्य परमात्मानं केवलं केवलेक्षणम् ।**
**मयातिधास्यते किंचिच्चूलिकाविनिबन्धनम् ॥ १ ॥**

अथ तत्र तावदिष्टदेवतानमस्कारो निर्विघ्नार्थः शिष्टव्यवहारपरिपालनार्थश्च स्तूयते;—

**योगिभिर्योगगम्याय केवलायाविनाशिने ।**
**ज्ञानदर्शनरूपाय नमोस्तु परमात्मने ॥ १ ॥ इति ।**

नमोऽस्तु—नमस्कारोऽस्तु नमस्कारो भवतु । कस्मै? परमात्मने—आत्मा जीव उपयोगलक्षणः, परमः प्रधानः संसारासारापारसागरसमुत्तीर्ण इत्यर्थः, स चासौ आत्मा च, परमात्मने नमः । किंविशिष्टाय ? योगगम्याय—योगः समाधिः शुभाशुभभावाभावस्वभावः सम्यग्ज्ञानमित्यर्थः, तेन गम्य इति योगगम्यो योगविषय इत्यर्थः । कैः ? योगिभिः—ध्यानिभिः । पुनरपि कथंभूताय ? केवलाय—शुद्धाय निष्कलायेति यावत् । अविनाशिने—अव्ययाय । पुनरपि कथंभूताय ? ज्ञानदर्शनरूपाय—ज्ञानं केवलज्ञानं, दर्शनं केवलदर्शनं, ज्ञानदर्शनमेव रूपं स्वरूपं यस्य स ज्ञानदर्शनरूपः, तदविनाभावादनन्तवीर्यानन्तसौख्यादीनां तदन्तर्भावः । एवंविधमतीतानागतवर्तमानकालगोचरं सामान्यापेक्षयैकं सिद्धपरमेष्ठिनं प्रणम्य पूर्वं, तदनन्तरं प्रायश्चित्तचूलिका विध्रियते ॥ १ ॥

**मूलोत्तरगुणेष्वीषद्विशेषव्यवहारतः ।**
**साधूपासकसंशुद्धिं वक्ष्ये संक्षिप्य तद्यथा ॥ २ ॥**

मूलोत्तरगुणेषु—मूलोत्तरविशेषेषु, मूलगुणा द्विविधा यतीनां श्रावकाणां च, तत्र यतिमूला अष्टाविंशतिः अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहादयः । श्रावकाणां मूलगुणा विविधा अष्टौ मद्यमांसमधुपंचोदुम्बरपरित्यागाः । उत्तरगुणा यतीनामनेकविकल्पा आतापनतोरणस्थानमौनादयः । श्रावकाणामुत्तरगुणाः सामायिकप्रोषधोपवासप्रभृतयस्तेषु विषये तान् प्रति । ईषत्—मनाक् किंचित् स्तोकं । विशेषव्यवहारतः—विशेषव्यवहारात् विशेषप्रायश्चित्तशास्त्रेभ्यः सकाशात् । साधूपासकसंशुद्धिं—साधूनां यतीनां, उपासकानां श्रावकाणां, संशुद्धिं विशुद्धिं प्रायश्चित्तं । वक्ष्ये—कथयिष्ये । संक्षिप्य—समासतः । तद्यथा—भवति, तथा कथ्यते ॥ २ ॥

**एकेन्द्रियादिजन्तूनां हृषीकगणनाद्वधे ।**
**चतुरिन्द्रियकुद्धानां प्रत्येकं तनुसर्जनम् ॥ ३ ॥**

एकेन्द्रियाः पंचप्रकाराः पृथिव्यप्तेजोवायुवनस्पतिकायिकाः ( वनस्पतिकायिकाः ) द्विभेदाः प्रत्येकवनस्पतयोऽनन्तकायवनस्पतयश्चेति । तत्र प्रत्येककायिका एकजीवस्यैकशरीरं ते च पूगफलनालिकेरादयः । अनन्तकायिका अनन्तजीवानामेकशरीरं तेऽपि गुडूचीसूरणादयः । आदिशब्देन द्वीन्द्रियाः शंखशुक्त्यादयः, त्रीन्द्रियाः कुन्थुपिपीलिकाप्रभृतयः, चतुरिन्द्रिया भ्रमरमक्षिकाप्रमुखाः, पंचेन्द्रिया मनुष्यमत्स्यमकरोरगादयः । तेषां जन्तूनां जीवानां वधे । हृषीकगणनात्—इन्द्रियसंख्यया प्रायश्चित्तं भवति । वधे—विनाशे मारणे च सति । चतुरिन्द्रियकुद्धानां—चतुरिन्द्रियपर्यन्तानां । प्रत्येकं—यथासंख्यं । तनुसर्जनं—तनुः शरीरं पंचप्रकारं औदारिकं, वैक्रियिकं, आहारकं, तैजसं, कार्मणामिति, तस्याः पंचप्रकाराया अपि तनोरुत्सर्जनं परित्यजनं मूर्च्छाममत्वाभावः तनूत्सर्जनं कायोत्सर्ग इत्यर्थः । स च शुद्धोपयोगलक्षणं विशुद्धात्मरूपं विश्वात्मकं लोकालोकावभासिनं परमात्मानमेव निर्जरार्थं ध्यायतः साधुर्भवति । पंचेन्द्रियाणामग्रतः प्रायश्चित्तं वक्ष्यति ॥ ३ ॥

**उत्तरमूलसंस्थेषु प्रमादाद्दर्पतश्छिदा।**
**कायोत्सर्गोपवासाः स्युरिन्द्रियप्राणसंख्यया ॥ ४ ॥**

उत्तरमूलसंस्थेषु—उत्तरमूलगुणाऽऽस्थितेषु । प्रमादात्—यत्ने कृतेऽपि जीववधे सति। दर्पात्—अप्रयत्नाद्धेतोः। छिदा—छेदः प्रायश्चित्तं। कायोत्सर्गोपवासाः—कायोत्सर्गाः उपवासाश्च। स्युः—भवेयुः। इंद्रियप्राण-संख्यया—इन्द्रियप्राणगणनया। तत्र तावदिन्द्रियाणि निगद्यन्ते—एकेन्द्रि-याणां पंचानामपि प्रत्येकमेकमेकेन्द्रियं स्पर्शनम्। द्वीन्द्रियस्य जन्तोः द्वे इन्द्रिये स्पर्शनं रसनं च। त्रीन्द्रियस्य त्रीणीन्द्रियाणि स्पर्शनं रसनं घ्राणं च। चतुरिन्द्रियानां चत्वारि स्पर्शनं रसनं घ्राणं चक्षुश्च। पंचेन्द्रियस्य पंचेन्द्रियाणि स्पर्शनं रसनं घ्राणं चक्षुः श्रोत्रं चेति। प्राणाश्चत्वारो भवन्ति इन्द्रियप्राणबलोच्छ्वासनिश्वासप्राणायुःप्राणा इति। तत्रेन्द्रियप्राणः पंचप्र-कारः प्रागुक्त एव। बलप्राणस्त्रिविधः मनोबलं वचनबलं कायबलमिति। एते सर्वे दश प्राणा भवन्ति। उक्तं च—

पंचेन्द्रियाणि त्रिविधं बलं च सोच्छ्वासनिश्वासयुतास्तथायुः ॥
प्राणा दशैते भगवद्भिरुक्तास्तेषां वियोगीकरणं तु हिंसा ॥ १ ॥ इति।

एकेन्द्रियस्य चत्वारः प्राणाः स्पर्शनेन्द्रियं, कायबलं, उच्छ्वासनिश्वास-प्राणः, आयुरिति। द्वीन्द्रियस्य षट्प्राणा भवन्ति स्पर्शनरसनमिति द्वे इन्द्रिये, कायबलं, वाग्बलं, उच्छ्वासनिश्वासप्राणः, आयुरिति। त्रीन्द्रियस्य सप्त प्राणा भवन्ति पूर्वोक्ता एव षट् घ्राणेन्द्रियाधिकाः। चतुरिन्द्रियस्याष्टौ प्राणाः पूर्वोक्ताः सप्त चक्षुरिन्द्रियाभ्याधिकाः। असंज्ञिपंचेन्द्रियस्य नव प्राणा भवन्ति प्रगुद्दिष्टा अष्ट श्रोत्रेन्द्रियाभ्यधिकाः। संज्ञिपंचेन्द्रियस्य दश प्राणाः प्रागुद्दिष्टा नव मनोबलालिंगिता इति। तत्रेन्द्रियप्राणगणनयोच्यते—उत्तरगुणधारिणः प्रयत्नवतः इन्द्रियप्राणगणनया कायोत्सर्गा भवन्ति। स्थिरस्येन्द्रियगणनया कायोत्सर्गा भवन्ति—एकेन्द्रियस्य वधे एकः कायोत्सर्गः, द्वीन्द्रिये द्वौ कायोत्सर्गौ, त्रीन्द्रिये त्रयः कायोत्सर्गाः,

चतुरिन्द्रिये चत्वारः, पंचेन्द्रिये पंच। अस्थिरस्य प्राणगणनया कायोत्सर्गाः सन्ति—एकेन्द्रियस्य वधे चत्वारः कायोत्सर्गाः, द्वीन्द्रिये षट्, त्रीन्द्रिये सप्त, चतुरिन्द्रियेऽष्टौ, असंज्ञिपंचेन्द्रिये नव, संज्ञिपंचेन्द्रिये दश कायोत्सर्गाः भवन्ति। अप्रयत्नव्रतस्थिरस्येन्द्रियगणनया कायोत्सर्गाः उपवासाः। अस्थिरस्य प्राणगणनया कायोत्सर्गा उपवासा भवन्ति। मूलगुणधारिणः प्रयत्नचारिणः स्थिरस्येन्द्रियगणनया कायोत्सर्गाः, अस्थिरस्य प्राणगणनया भवन्ति। अप्रयत्नचेष्टस्य स्थिरस्येन्द्रियगणनया कायोत्सर्गाः उपवासाः। अस्थिरस्य प्राणगणनयोपवासा भवन्ति॥ ४॥

**अथवा यत्न्ययत्नेषु हृषीकप्राणसंख्यया।**
**कायोत्सर्गा भवन्तीह क्षमणं द्वादशादिभिः॥ ५॥**

अथवा—अन्यमतेन। यत्न्ययत्नेषु—यत्निष्वप्रयत्नवत्सु [प्रयत्नेषु] पुरुषेषु प्रत्येकं। हृषीकप्राणसंख्यया—इन्द्रियप्राणगणनया प्रायश्चित्तं, (प्रयत्नपरेषु इन्द्रियगणनया) अप्रयत्नपरेषु प्राणगणनया कायोत्सर्गाः—। भवन्ति—सन्ति। इह—अस्मिन् शास्त्रे। क्षमणं—उपवासस्तु। द्वादशादिभिः—द्वादशप्रभृतिभिरेकेन्द्रियादिभिर्भवति। द्वादशभिरेकेन्द्रियैरेक उपवासः। षड्भिः द्वीन्द्रियैरुपवासः। चतुर्भिस्त्रीन्द्रियैरुपवासः। त्रिभिश्चतुरिन्द्रियैरुपवास इति॥ ५॥

**षट्त्रिंशन्मिश्रभावार्कग्रहैकेषु प्रतिक्रमः।**
**एकद्वित्रिचतुःपंचहृषीकेषु स षष्ठयुक्॥ ६॥**

षट्त्रिंशन्मिश्रभावार्कग्रहैकेषु—मिश्रभावा अष्टादश ज्ञानदर्शनादयः, अर्काः द्वादश, ग्रहा नव तेषु षट्त्रिंश [त्स] द्वादिषु। प्रतिक्रमः—प्रतिक्रमणं उपस्थानं। एकद्वित्रिचतुःपंचहृषीकेषु—एकेन्द्रियादिषु, एकस्मिन् पंचेन्द्रिये प्रत्येकं सः। षट्त्रिंशत्सु एकेन्द्रियेषु अष्टादशसु द्वीन्द्रियेषु द्वादशसु त्रीन्द्रियेषु नवसु चतुरिन्द्रियेषु एकस्मिन् पंचेद्रिये प्रत्येकं। सः—पूर्वोपदिष्टः प्रतिक्रमः प्रायश्चित्तं भवति। षष्ठयुक्—षष्ठेन द्वाभ्यां निरन्तराभ्यां उपवासाभ्यां युतः समान्वितः। उक्तं चान्यैः—

वारसमाई काउं चउआलस अंतु जाव विस्सें तु ।?
नियमेण पुव्वोच्छे उवरि पडिक्कमेण पुव्वं तु ॥ इति ।

**निष्प्रमादः प्रमादी च प्रत्येकं स स्थिरोऽस्थिरः ।**
**मूलधार्युत्तराधारस्तस्यासंज्ञिविघातिनः ॥ ७ ॥**

निष्प्रमादः—प्रमादः संज्वलनतीव्रोदयः प्रमादान्निष्क्रान्तो निष्प्रमादः । प्रमादो यस्यास्तीति प्रमादी । प्रत्येकं—एकं एकं प्रति । सः—निष्प्रमादः प्रमादी च । स्थिरः—लब्धप्रतिष्ठः, अपरोऽपि, अस्थिरश्च परश्च (स्व) भाव इति निष्प्रमादो द्विभेदभिन्नो भवति । प्रमादी च द्विभेदः । एवं चतुष्प्रकारो मूलधारी—मूलगुणधारी भवति । उत्तराधारः—उत्तरगुणोपपन्नोऽपि चतुर्विधो भवति । तस्य—पूर्वाभिहितस्य मूलगुणधारिण उत्तरगुण धारिणश्च । असंज्ञिविघातिनः—असंज्ञिपंचेंद्रियोपमर्दिनः प्रायश्चित्तमुपरि वक्ष्यते ॥ ७ ॥

**उपवासास्त्रयः षष्ठं षष्ठं मासो लघुः सकृत् ।**
**कल्याणं त्रिचतुर्थानि कल्याणं षष्ठकं क्रमात् ॥ ८ ॥**

उपवासाः—क्षमणानि, त्रयः भवन्ति । षष्ठं—द्वौ उपवासौ । पुनः षष्ठं । मासो लघुः—लघुमासः । सकृत्-एकवारं । कल्याणं—पंचकं । त्रिचतुर्थानि—त्रीणि चतुर्थानि त्रय उपवासा इत्यर्थः । पुनः कल्याणपंचकं । षष्ठं । क्रमात्—क्रमेण । एतानि प्रायश्चित्तानि मूलोत्तरगुणधारिणः सकृदसंज्ञिपंचेन्द्रिये हते सति यथासंख्यं भवन्ति ॥ ८ ॥

**षष्ठं मासो लघुर्मूलं मूलच्छेदोऽसकृत्पुनः ।**
**उपवासास्त्रयः षष्ठं लघुमासोऽथ मासिकम् ॥ ९ ॥**

षष्ठं—षष्ठप्रायश्चित्तं । मासो लघुः—लघुमासः । मूलं—मासिकं । मूलच्छेदः—पुनरपि मासिकप्रायश्चित्तं । असकृत्पुनः—अनेकवारं तु । उपवासास्त्रयः—त्रीणि क्षमणानि । षष्ठं—षष्ठप्रायश्चित्तं । लघुमासः—लघुमास-

प्रायश्चित्तं । अथ-अनन्तरं । मासिकं—पंचकल्याणं । एतच्चासकृदसंज्ञिपंचेन्द्रियस्य वधे कृते सति तयोरेव यथासंख्यं प्रायश्चित्तं भवति ॥ ९ ॥

**एतत्सान्तरमाम्नातं संज्ञिनि स्यान्निरन्तरम् ।**
**तीव्रमंदादिकान् भावानवगम्य प्रयोजयेत् ॥ १० ॥**

एतत्—अदः प्रागुक्तं प्रायश्चित्तं । सान्तरं—सव्यवधानं व्याधिप्रभृतिकारणसमागमे सत्याचार्यानुज्ञया विश्रम्यापि क्रियते इति सान्तरं । आम्नातं—अभिहितं । संज्ञिनि स्यान्निरन्तरं—संज्ञी शिक्षाक्रियालापग्राही तस्मिन् निहते सति, स्याद्भवेत्, निरन्तरं यदसंज्ञिपंचेन्द्रियोद्दिष्टं प्रायश्चित्तं संज्ञिपंचेन्द्रिये तदेव निरन्तरं व्यवधानविवर्जितं भवति । तीव्रमंदादिकान् भावान्—भावाः परिणामः स च त्रिविधो भवति शुभाशुभविशुद्धविशेषात् । तत्र शुभः पुण्योपचयहेतुः । अशुभः पापोपचयकारणं द्वेषात्मपरिणामोऽशुभः । रागरूपः शुभोऽपि भवत्यशुभश्च । विशुद्धोऽनुभयात्मकः । स पक्षकस्तेन्यस्तानां ? भवति । तत्राशुभो भावस्त्रिविधतीव्रो मन्दो मध्य इति । तत्र चाशुभस्तीव्रः कृष्णलेश्यो, मध्यमो नीललेश्यो, मन्दः कपोतलेश्य इति । शुभोऽपि त्रिभेदभिन्नो भवति । तत्र शुभो मंदस्तेजोलेश्यः, मध्यमः पद्मलेश्यः, तीव्रः शुक्लेश्यः । पुनस्तीव्रादयो भावास्तीव्रतरतीव्रतमभेदविशेषविशिष्टा भवंति । पुनस्तेऽपि प्रत्येकं त्रिविधाः । एवं शुभभावाश्च तावद्यावदसंख्येया लोका इति । एवमेतान् । अवगम्य —ज्ञात्वा । प्रयोजयेत्—प्रायश्चित्तं सम्बन्धयेत् ॥ १० ॥

**साधूपासकबालस्त्रीधेनूनां घातने क्रमात् ।**
**यावद्द्वादशमासाः स्यात् षष्ठमर्धार्धहानियुक् ॥ ११ ॥**

साधूपासकबालस्त्रीधेनूनां—साधुर्यती रत्नत्रयधारी, उपासकः संयतासंयतः, बालः शिशुः, स्त्री योषिन्महिला, धेनुर्गौः तासां । घातने—व्यापादने । क्रमात्—यथाक्रमेण । यावद्द्वादशमासाः—द्वादशमासा यावत् । स्यात्—

भवेत् । षष्ठं—षष्ठोपवासः । ऋषिहत्यायां सत्यां द्वादशमासा यावत् षष्ठेन षष्ठेन कृत्वा पारणं प्रायश्चित्तं भवति । अर्धार्धहानियुक्—अर्धार्धहानियुतं ततस्तदेव षष्ठमर्धार्धहानियुक्तं भवति । श्रावकस्य घाते कृते सति षण्मासाः षष्ठेन षष्ठेन पारणं । बालस्य घाते सति त्रयो मासाः षष्ठेन षष्ठेन पारणं । स्त्रीघाते सार्धो मासः षष्ठेन षष्ठेन पारणं । गोघाते त्रयोविंशतिदिवसाः षष्ठेन षष्ठेन पारणाप्रायश्चित्तं भवति ॥ ११ ॥

**पाषंडिनां च तद्भक्ततद्योनीनां विघातने ।**
**आषण्मासं भवेत्षष्ठं तदर्धार्धं ततः परम् ॥ १२ ॥**

पाषंडिनां—अन्यलिंगिनां भौतिकभिक्षुपरिव्राट्कापालिकादीनां । तद्भक्तयोनीनां—तेषां पाषण्डिनां ये भक्ता उपसेविनः माहेश्वरादयस्तेषां, तद्योनीनां माहेश्वरादीनां योनीनां योनिभूतानां स्वजनानामित्यर्थः तेषां च । घातेने सति । आषण्मासं भवेत् षष्ठं—पाषण्डिघाते सति आषण्मासं यावत्, षष्ठं षष्ठप्रायश्चित्तं भवति । तदर्धार्धं ततः परं—तस्य षण्मासषष्ठस्य यथागममर्धार्धं, ततः परं तदनन्तरं भवति । तद्भक्तवधे त्रयो मासाः षष्ठप्रायश्चित्तं भवति । ( तद्योनिवधे सार्धो मासः षष्ठप्रायश्चित्तं भवति )॥ १२ ॥

**ब्राम्हणक्षत्रविट्छूद्रचतुष्पदविघातिनः ।**
**एकान्तराष्टमासाः स्युः षष्ठाद्यन्ताश्च पूर्ववत् ॥ १३ ॥**

ब्राह्मणक्षत्रविट्छूद्रचतुष्पदविघातिनः—ब्राह्मणाः लौकिका विप्राः, क्षत्राः क्षत्रियाः, विशो वैश्याः, शूद्रास्तत्प्रेषणकारिणः तक्षाभीरकुम्भकारादयः चतुष्पदास्तान् विहन्तीत्येवं शीलस्तद्विघाती । अथवा तद्विघातोऽस्यास्तीति तद्विघाती तस्य ब्राह्मणक्षत्रविट्छूद्रचतुष्पदविघातिनः साधोः । एकान्तराष्टमासाः—एकान्तरेण एकान्तरोपवासेन, अष्टमासाः अष्टौ त्रिंशद्रात्राः । स्युः—भवेयुः । षष्ठाद्यन्ताः—षष्ठाद्याः षष्ठान्ताश्च आदावन्ते च षष्ठं भवतीत्ययमर्थः । पूर्ववत्—अर्धार्धहानितः । लौकिकब्राह्मणघाते कथंचि-

त्संपन्ने षष्ठाद्यन्ता अष्टमासा एकान्तरोपवासेन प्रायश्चित्तं भवति। क्षत्रिय-घाते चत्वारो मासाः। वैश्यघाते द्वौ मासौ। शूद्रघाते मासः। चतुष्पद-विघाते सत्यर्धमासो भवति॥ १३॥

**तृणमांसात्पतत्सर्पपरिसर्पजलौकसाम्।**
**चतुर्दशनवाद्यन्तक्षमणानि वधे छिदा॥ १४॥**

तृणमांसात्पतत्सर्पपरिसर्पजलौकसां—तृणात् तृणचरः, मांसात् मांसाशी, पतत् पक्षी, सर्पो विषधरः, परिसर्पः गोधेरादिः, जलौकसो जलचरास्तेषां घाते सति। चतुर्दशनवाद्यन्तक्षमणानि—चतुर्दशादीनि [1]नवान्तानि क्षमणानि उपवासाः। वधे—घाते। छिदा—छेदः प्रायश्चित्तं भवति। तृणचरस्य मृगशशकरोध्रादेर्विघाते चतुर्दशोपवासा भवन्ति। मांसाशिनः सिंहव्याघ्रचित्रकादेर्विघाते त्रयोदश उपवासाः। तित्तिरिमयूरकुर्कटपारापतादिपक्षिविशेषविघाते द्वादशोपवासाः। सर्पगौनसादौ सर्पजातिव्यापादने एकादशोपवासाः। गोधेरककृकलासादिपरिसर्पविनाशे दशोपवासाः। मकरशिशुमारमत्स्यकच्छपादीनां विनाशने नवोपवासाः सन्ति॥ १४॥

प्रथमं व्रतम्

---

**प्रत्यक्षे च परोक्षे च द्वयेऽपि च त्रिधानृते।**
**कायोत्सर्गोपवासाः स्युः सकृदेकैकवर्धनात्॥ १५॥**

प्रत्यक्षे च—व्यक्तं। परोक्षे—असमक्षं च। तद्द्वयेऽपि—प्रत्यक्षे परोक्षे च। त्रिधा—मनसा, वचसा, कायेन च। अनृते—असत्यभाषणे कृते सति। कायोत्सर्गोपवासाः—कायोत्सर्गा उपवासाश्च प्रायश्चित्तं। स्युः—भवेयुः। सकृत्—एकवारं। एकैकवर्धनात्—एकोत्तरवृद्ध्या। च शब्दोऽनुकृष्ट समुच्चयार्थः। तेन सप्रतिक्रमणाः कायोत्सर्गोपवासाः सन्ति। प्रत्यक्षमृषा-

---

१ द्विरुक्तोयं शब्दः पुस्तके।

वादे एकः कायोत्सर्ग उपवासश्च प्रतिक्रमणः। परोक्षे मृषावादे द्वौ कायोत्सर्गोपवासौ च प्रतिक्रमणे। उभयस्मिन् मृषावादे त्रयः कायोत्सर्गा उपवासाश्च प्रतिक्रमणः (णाः)। त्रिधामृषावादे चत्वारः कायोत्सर्गाः उपवासाश्च प्रतिक्रमणपुरस्सरा भवन्ति एकवारम्॥ १५॥

**असकृन्मासिकं साधोरसद्दोषाभिभाषिणः।**
**कषायादभियुक्तस्य परैर्वा द्विगुणादि तत्॥ १६॥**

असकृन्मासिकं—अनृत इति वर्तते तेन असकृदनेकवारमनृते सति मासिकं पंचकल्याणं प्रायश्चित्तं भवति। साधोरसद्दोषाभिभाषिणः—साधोर्यतेः संबन्धिनः, असतोऽविद्यमानस्य, दोषस्यापराधस्य, यः कश्चिन्मुनिरभिभाषणशीलस्तस्य। कषायात्—क्रोधमानमायालोभैर्हेतुभूतैः। अभियुक्तस्य परैर्वा—परैरन्यैर्वा समीपस्थितैः, अभियुक्तस्य प्रेरितस्य सतः। द्विगुणादि तत्—पूर्वोक्तं प्रायश्चित्तं कायोत्सर्गादिमासिकपर्यन्तं द्विगुणादि भवति द्विगुणं त्रिगुणं चतुर्गुणं पंचगुणं अधिकगुणं च वापि देयम्॥ १६॥

**नीचः पैशून्ययुष्टस्य गच्छाद्देशाद्बहिष्कृतिः**
**तच्छ्रुत्वा मन्यमानोऽपि दोषपादांशमश्नुते॥ १७॥**

नीचः—पृथग्भूतस्य निकृष्टस्य। पैशून्ययुष्टस्य—पिशुनो दुर्जनः तस्य भावः पैशून्यं तेन युष्टस्य सेवितस्योपहतस्य सतः। गच्छात्—गणात्। देशात्—विषयाच्च। बहिष्कृतिः—बहिष्करणमुद्वासनं प्रायश्चित्तं भवति॥ तच्छ्रुत्वा—तत्साधोः सम्बन्धि पैशुन्यं श्रुत्वा आकर्ण्य। मन्यमानोऽपि—मन्वानश्च मुनिः। दोषपादांशं—तद्दोषचतुर्भागं। अश्नुते—लभते॥ १७॥

द्वितीयं व्रतम्

---

**सकृच्छून्ये समक्षं चानाभोगेऽदत्तसंग्रहे।**
**कायोत्सर्गोपवासाः स्युः प्राग्वन्मूलगुणोऽसकृत्॥ १८॥**

सकृत्—एकवारं । शून्ये—विजने । समक्षं—सपक्षम्, प्रत्यक्षम्। अनाभोगे—मिथ्यादृष्टयादीनामपरिपश्यतां विशेषवतः पदार्थस्य । अदत्त-संग्रहे—अवितीर्णग्रहणे सति । कायोत्सर्गोपवासाः—कायोत्सर्गा उपवासाश्च । स्युः—भवेयुः । प्राग्वत्—पूर्ववत् एकोत्तरवृद्ध्या इत्यर्थः । चशब्दात्प्रतिक्रमणपुरस्सराः कायोत्सर्गोपवासाः सन्ति । शून्येऽदत्तादाने एकः कायोत्सर्ग उपवासश्च सप्रतिक्रमणः । प्रत्यक्षमदत्तादाने सति द्वौ कायोत्सर्गौ द्वावुपवासौ सप्रतिक्रमणौ सुवर्णहिरण्यादौ तु मूलगुणप्रायश्चित्तं भवति । मूलगुणोऽसकृत्—असकृदनेकवारं अदत्तादाने मूलगुणः पंचककल्याणं स्यात् ॥ १८ ॥

**आचार्यस्योपधेरर्हा विनेयास्तान् विना पुनः ।**
**सधर्माणोऽथ गच्छश्च शेषसंघोऽपि च क्रमात् ॥ १९ ॥**

आचार्यस्य—गणिनः । उपधेः—पुस्तकाद्युपकरणस्य । अर्हाः—योग्याः । विनयाः—तच्छिष्याः । तान् विना पुनः—शिष्यैर्विना तु । सधर्माणः—गुरुभ्रातरः अर्हाः । अथ—अनन्तरं सधर्मणो विना । गच्छः—स्वगणोऽपि त्रिपुरुषान्वयोऽपि अर्हः । गच्छं विना, शेषसंघोऽपि च—शेषोऽवशिष्टः संघश्च सप्तपुरुषान्वयोऽपि योग्यः । क्रमात्—क्रमेण यथान्यायं यथाक्रमं परिपाट्या ॥ १९ ॥

**सर्वे स्वामिवितीर्णस्य योग्यो ज्ञानोपधेरपि ।**
**स्वामिना वा वितीर्येत यस्मै सोऽपि तमर्हति ॥ २० ॥**

सर्वे—निरवशेषाः साधवः शिष्यादयोऽन्यसम्बन्धिनोऽपि । स्वामिवितीर्णस्य—उपकरणस्य, प्रभुणा प्रवितीर्णस्योपकरणस्य अर्हा भवन्ति । योग्यो ज्ञानोपधेरपि—ज्ञानोपधेः पुस्तकस्य तु योग्यः य एव योग्यो ज्ञानी स एवार्हः । स्वामिना वा वितीर्येत यस्मै—वा अथवा, स्वामिना पुस्तकपतिना, यस्मै साधवे, वितीर्येत दीयते । सोऽपि—स च । तं—ज्ञानोपधिं । अर्हति—भजति गृह्णाति ॥ २० ॥

**एवंविधिं समुल्लंघ्य यः प्रवर्तेत मूढधीः ।**
**बलवन्तं समासृत्य यो वादत्ते प्रदोषतः ॥ २१ ॥**

एवंविधिं—एवंभूतां व्यवस्थां । समुल्लंघ्य—अतिक्रम्य । यः—कश्चित् साधुः । प्रवर्तेत—प्रवर्तते चेष्टते । मूढधीः—मूढबुद्धिः । बलवन्तं समासृत्य यो वादत्ते—वा अथवा, यो यतिः, बलवन्तं बलिनं नरेन्द्रादिकं, समासृत्य उपपद्य, आदत्ते गृह्णाति उपकरणं । प्रदोषतः—प्रदोषात् प्रद्वेषात्, तस्य वक्ष्यमाणो दण्डः ॥ २१ ॥

**सर्वस्वहरणं तस्य षण्मासः क्षमणं भवेत् ।**
**योऽन्यथापि तमादत्ते तस्य तन्मौनसंयुतं ॥ २२**

तस्य—तस्यान्यायविधायिनः । सर्वस्वरहणं—निरवशेषपुस्तकाद्युपकरणापहारो दण्डः । षण्मासः क्षमणं—षण्मासान् यावदेकान्तरोपवासश्च । भवेत्—स्यात् । योऽन्यथापि तमादत्ते—यः साधुः, अन्यथापि अन्येनापि केनचित्प्रकारान्तरेण, तमुपधिं, आदत्ते गृह्णाति । तस्य—साधोः । तत्—तदेव प्रागभिहितं षण्मासक्षमणं प्रायश्चित्तं भवति । मौनसंयुतं—मौनेन समन्वितम् ॥ २२ ॥

तृतीयं व्रतम् ।

---

**क्रियात्रये कृते दृष्टे दुःस्वप्ने रजनीमुखे ।**
**सोपस्थानं चतुर्थं नि-यमाभुक्ती प्रतिक्रमः ॥ २३ ॥**

क्रियात्रये-स्वाध्यायनियमवंदनाकरणत्रितये । कृते—सति, विहिते सति । दृष्टे—विलोकिते । दुःस्वप्ने—रेतश्च्युतौ सतीत्यर्थः । रजनीमुखे—प्रदोषसमये । सोपस्थानं चतुर्थं-सोपस्थानं सप्रतिक्रमणं, चतुर्थमुपवासः । नियमाभुक्ती नियमो लघुप्रतिक्रमणं, अभुक्तिरुपवासः । प्रतिक्रमः—अयं प्रतिक्रमो नियम इति ग्राह्यः । रात्रेः प्रथमभागे स्वाध्यायाद्यन्यतराक्रियां

विधाय सुप्तस्य दुःस्वप्ने सति सप्रतिक्रमणोपवासः प्रायश्चित्तं भवति। क्रियाद्वयं विधाय सुप्तस्य दुःस्वप्ने सति नियमोपवासौ भवतः। क्रियात्रयमपि कृत्वा प्रसुप्तस्य सतः दुःस्वप्ने सति नियमः प्रायश्चित्तं भवतीति यथाक्रमं योज्यम् ॥ २३ ॥

**नियमक्षमणे स्यातामुपवासप्रतिक्रमौ।**
**रजन्या विरहे तु स्तः क्रमात् षष्ठप्रतिक्रमौ ॥ २४ ॥**

नियमक्षमणे—नियमोपवासौ। स्यातां—भवेतां। उपवासप्रतिक्रमौ—उपवासप्रतिक्रमणौ। रजन्या विरहे तु—रात्रेः पश्चिमप्रहरे पुनः। स्तः—भवतः। क्रमात्—क्रमेण यथासंख्यं। षष्ठप्रतिक्रमौ—षष्ठप्रतिक्रमणौ। रात्रेश्चरमप्रहरे एकां क्रियां विधाय संसुप्तस्य दुःस्वप्ने सति नियमोपवासौ प्रायश्चित्तं। क्रियाद्वयं विधाय शयितस्य दुःस्वप्ने सति उपवासेन सह प्रतिक्रमणो भवति। ( [1]क्रियात्रयं विधाय शयितस्य दुःस्वप्ने सति सप्रतिक्रमणं षष्ठं प्रायश्चित्तं भवति ) ॥ २४ ॥

**मद्यमांसमधु स्वप्ने मैथुनं वा निषेवते।**
**उपवासोऽस्य दातव्यः सोपस्थानश्च चेद्बहु ॥ २५ ॥**

मद्यमांसमधु—मद्यं सुरा, मांसं पिशितं, मधु माक्षिकं। स्वप्ने—निद्रायां। मैथुनं वा—अब्रह्म वा। निषेवते—यद्यनुभवति। तदानीं, उपवासोऽस्य दातव्यः—उपवासः प्रायश्चित्तं, अस्य एतस्य साधोः, दातव्यो देयः। सोपस्थानश्च—प्रतिक्रमणायोपलक्षितो भवति। चेद्बहु—यदि मद्यमांसमैथुनादि बहु निषेवितं भवति ॥ २५ ॥

**तरुण्या तरुणः कुर्यात्कथालापं सकृद्यदि।**
**उपवासोऽस्य दातव्योऽसकृत् षण्मासपश्चिमः ॥ २६ ॥**

१ नायं कंसस्थः पाठः पुस्तके अर्थानुसारित्वात् स्वबुद्धया परिकल्प्य संयोजितः। पश्यतु छेदपिण्डस्य ५७–५८ गाथाद्वयं।

तरुण्या—स्त्रिया सह । तरुणो—युवा यतिः । कुर्यात्—करोति । कथालापं—कथा वाक्यप्रबंधं, आलापं सामान्यवचनं । सकृत्—एकवारं । यदि—चेत् कथंचित् । उपवासोऽस्य दातव्यः—उपवासः प्रायश्चित्तं, अस्य एतस्य स्त्रीकथालापकारिणः, दातव्यो देयः । असकृत्—अनेकवारं । यदि स्त्रीभिः सह कथालापं करोति तदा स एवोपवासः । षण्मासपश्चिमः—षण्मासावधिर्भवति ॥ २६ ॥

**स्त्रीजनेन कथालापं गुरूनुल्लंघ्य कुर्वतः ।**
**स्यादेकादि प्रदातव्यं षष्ठं षण्मासपश्चिमं ॥ २७ ॥**

स्त्रीजनेन कथालापं—स्त्रीजनेन योषिन्निवहेन सह, कथालापं रहस्यादि समुल्लापं । गुरूनुल्लंघ्य—आचार्योपाध्यायादिभिर्विनिवारितस्यापि । कुर्वतो—विदधानस्य । स्यात्—भवेत् । एकादि प्रदातव्यं षष्ठं—एकषष्ठादि प्रायश्चित्तं प्रदातव्यं । षण्मासपश्चिमं—षण्मासावधि ॥ २७ ॥

**स्त्रीजनेन कथालापं गुरूनुल्लंघ्य कुर्वतः ।**
**त्याग एवास्य कर्तव्यो जिनशासनदूषिणः ॥ २८ ॥**

स्त्रीजनेन—महिलासमूहेन । कथालापं—गुह्यकथासमुल्लापं । गुरून्—आचार्यादीन् । उल्लंघ्य—अतिक्रम्य । कुर्वतो—विदधतः । त्याग एवास्य कर्तव्यः—अस्य निरंकुशस्य त्याग एव उद्वासनमेव कर्तव्यो विधेयः । जिनशासनदूषिणः सर्वज्ञाज्ञाकलङ्ककारिणः ॥ २८ ॥

**स्थातुकामः स चेद्भूयस्तिष्ठेत्क्रमणमौनतः ।**
**आषण्मासमयः कालो गुरूद्दिष्टावधिर्भवेत् ॥ २९ ॥**

स्थातुकामः—स्थातुमनाः । सः—पूर्वोक्तः । चेत् (?) । समयः (?) । गुरूद्दिष्टावधिः—आचार्योपदिष्टमर्यादः । भवेत्—स्यात् । यावन्तं कालं आचार्योऽभीच्छति तावान् कालो भवति ॥ २९ ॥

**दृष्ट्वा योषामुखाद्यङ्गं यस्य कामः प्रकुप्यति।**
**आलोचना तनूत्सर्गस्तस्य च्छेदो भवेदयम्॥ ३०॥**

दृष्ट्वा—अवलोक्य। योषामुखाद्यङ्गं—स्त्रीवदनाद्यवयवं। यस्य—कस्यचिन्मन्दभाग्यस्य। कामो—ऽभिलाषः। प्रकुप्यति—उत्कोचमायाति। आलोचना—गुरुभ्यः स्वदोषविनिवेदनं। तनूत्सर्गः—कायोत्सर्गः। तस्य—प्रागुक्तस्य साधोः। छेदः—प्रायश्चित्तं। भवेत्—स्यात्। अयं—एषः॥ ३०॥

**स्त्रीगुह्यालोकिनो वृष्यरससंसेविनो भवेत्।**
**रसानां हि परित्यागः स्वाध्यायोऽचित्तरोधिनः॥ ३१॥**

स्त्रीगुह्यालोकिनः—स्त्रीणां गुह्यादेः योनिप्रभृत्यवयवस्यालोकनशीलस्य लिंगिनः। वृष्यरससंसेविनः वृषाणीन्द्रियाणि तेभ्यो हिता बलोपचयविधायिनो वृष्यास्ते च ते रसाश्च वृष्यरसास्तान् संसेवते इत्येवं शीलः वृष्यरससंसेवी तस्य च। भवेत्—स्यात्। रसानां—दधिदुग्धशाल्योदनघृतपूरादीनामिन्द्रियबलवर्धनानां। हि—स्फुटं। परित्यागः—परिवर्जनं प्रायश्चित्तं भवति। स्वाध्यायोऽचित्तरोधिनः—स्वाध्यायोऽपराजितादिपरममंत्रपदजपः परमागमाध्ययनं च सोऽयमनुचरतः स्वाध्यायो विशुद्धध्यानाधारभूतः प्रायश्चित्तं भवति प्रज्ञातिशयाध्यवसानविशुद्धिहेतुत्वात्। उक्तं च—

मनः सदर्थाधिगमे प्रसक्तं वाक्यार्थयोगे नयने पदेषु।
श्रुतिः श्रुतौ निश्चलविग्रहस्य ध्यानेऽपि चैकाग्र्यमिहापि तुल्यम्॥१॥ इत्यादि।

अचित्तरोधिनो मनोरोधविरहितस्य सतः साधोः तत्वाभ्यास एव प्रायश्चित्तं भवति॥ ३१॥

चतुर्थम्।

---

**उपधेः स्थापनाल्लोभाद्दैन्याद्दानप्ररूढितः ।**
**संग्रहात् क्षमणं षष्ठमष्टमं मासमूलके ॥ ३२ ॥**

उपधेः—गृहस्थोपकरणस्य । स्थापनात्—प्रणिधानात् । लोभात्—मूर्च्छायाः । दैन्यात्—कार्पण्यात् । दानप्ररूढितः—रूढिप्रदानात् प्रसिद्धदानग्रहणात् । संग्रहात्—सर्वपरिग्रहग्रहणाद्धेतोः । क्षमण—मुपवासः । षष्ठं—षष्ठप्रायश्चित्तं । अष्टमं—अष्टमदण्डनं । मासमूलके—द्वे, मासः मासिकं, मूलं पुनर्दीक्षा । गृहस्थमात्रास्थापने क्षमणं प्रायश्चित्तं सोपस्थानं । सुवर्णहिरण्यादिपरिग्रहलोभे च सति षष्ठं । याचित्वा सुवर्णहिरण्यादिपरिग्रहादानेऽष्टमं । ग्रहणसंक्रान्तिव्यतिपातादिषु प्रसिद्धेषु हिरण्यसुवर्णादिसंग्रहणे सति मासिकं । हिरण्यसुवर्णमणिमुक्ताफलादिसाभोगपरिग्रहसमादाने मूलं प्रायश्चित्तं भवति ॥ ३२ ॥

पंचमम् ।

---

**रात्रौ ग्लानेन भुक्ते स्यादेकस्मिँश्च चतुर्विधे ।**
**उपवासः प्रदातव्यः षष्ठमेव यथाक्रमम् ॥ ३३ ॥**

रात्रौ—निशि । ग्लानेन—व्याधिविशेषपरिश्रमविविधोपवासादिपरिपीडितेन सता कर्मोदयवशात् प्राणसंकटे । भुक्ते—ऽभ्यवहृते सति । स्यात्—भवेत् । एकस्मिन्—भुक्ते एकतराहारे भुक्ते, सति । चतुर्विधे चतुष्प्रकारे अशने पाने खाद्ये स्वाद्ये च । उपवासः—क्षमणं । प्रदातव्यः—प्रदेयः । षष्ठमेव षष्ठं । यथाक्रमं—यथासंख्यं । एकस्मिन्नाहारे क्षमणं । चतुर्विधाहारे षष्ठमिति प्रयोज्यम् ॥ ३३ ॥

षष्ठम् ।

---

**व्यायामगमनेऽमार्गे प्रासुकेऽप्रासुके यतेः ।**
**कायोत्सर्गोपवासौ स्तोऽपूर्णक्रोशे यथाक्रमम् ॥ ३४ ॥**

व्यायामगमने—पादश्रमकरणप्रयाणे सति । अमार्गे—उत्पथे । प्रासुके—प्रगता असवः प्राणा यस्मादसौ प्रासुकः विजन्तुकस्तस्मिन् । अप्रासुके—सजन्तुके च । यतेः—साधोः । कायोत्सर्गोपवासौ—कायोत्सर्गः उपवासश्च एतौ द्वावपि । स्तः—भवतः । अपूर्ते ( र्णे )—असंभृते । क्रोशे—गव्यूतौ द्विदण्डसहस्रप्रमाणेऽध्वनि । यथाक्रमं—यथासंख्यं । प्रासुकमार्गेण व्यायामनिमित्तं गतस्य कायोत्सर्गः । अप्रासुकमार्गेणोपवास इति ॥ ३४ ॥

**घननीहारतापेषु क्रोशैर्वन्हिस्वरग्रहैः ।**
**क्षमणं प्रासुके मार्गे द्विचतुःषड्भिरन्यथा ॥ ३५ ॥**

घननीहारतापेषु—घनः घनकालः वर्षाकालः, नीहारः नीहारकालः शीतकालः, तापः तापकालः उष्णसमयः तेषु । क्रोशैः—गव्यूतिभिः । वन्हिस्वरग्रहैः—वन्हयः त्रयः, स्वराः षट्, ग्रहा नव तैः कृत्वा गमने सति । क्षमणं—उपवासः । प्रासुके मार्गे—विजन्तुके वर्त्मनि । द्विचतुःषड्भिरन्यथा—अन्यथाऽन्येन प्रकारेण अप्रासुके मार्गे द्विचतुःषड्भिः क्रोशैः क्षमणं । द्वाभ्यां वर्षाकाले अप्रासुके मार्गे गमने सति उपवासः प्रायश्चित्तं भवति । चतुः क्रोशेषु शीतकालेऽप्रासुकमार्गे गमने क्षमणं प्रायश्चित्तं भवतीति यथाक्रमं योज्यं । एतद्दिवसे उत्तरत्र रात्रिग्रहणात् ॥ ३५ ॥

**दशमादष्टमाच्छुद्धो रात्रिगामी सजन्तुके ।**
**विजन्तौ च त्रिभिः क्रोशैर्मार्गे प्रावृषि संयतः ॥ ३६ ॥**

दशमात्—चतुर्भिर्निरन्तरोपवासैः । अष्टमात्—त्रिभिर्निरन्तरोपवासैः । शुद्धो—विशुद्धो भवति । रात्रिगामी—रात्रौ गच्छतीत्येवंशीलः रात्रिगामी निशाप्रयासी । सजन्तुके—सजीवे मार्गे । विजन्तौ च प्रासुकेऽपि । त्रिभिः क्रोशैः—त्रिभिर्गव्यूतिभिः । मार्गे—वर्त्मनि । प्रावृषि—प्रावृट्काले । संयतः—साधुः । प्रावट्काले कथंचिद्रात्रिगमने सति अप्रासुकमार्गेण दशमं प्रायश्चित्तं भवति । त्रिभिः क्रोशैः प्रासुके चाष्टमात् संशुद्धयति ॥ ३६ ॥

**हिमे क्रोशचतुष्केणाप्यष्टमं षष्ठमीर्यते ।**
**ग्रीष्मे क्रोशेषु षट्सु स्यात् षष्ठमन्यत्र च क्षमा ॥ ३७ ॥**

हिमे—हिमकाले । क्रोशचतुष्केणापि—गव्यूतिचतुष्टयेन गत्वा । अष्टमं—अष्टमप्रायश्चित्तं भवति । प्रासुके तु षष्ठं स्यात् । ग्रीष्मे—उष्णकाले । क्रोशेषु षट्सु—षट्सु गव्यूतिषु । स्यात्—भवेत् । षष्ठं—द्वावुपवासौ निरन्तरौ । अन्यत्र च—प्रासुकमार्गेऽपि । क्षमा—क्षमणमुपवासः । उष्णकाले षट्सु क्रोशेषु रात्रिगमने सति अप्रासुकमार्गेण षष्ठं प्रायश्चित्तं । प्रासुकमार्गे पुनः क्षमणं भवति ॥ ३७ ॥

**सप्रतिक्रमणं मूलं तावन्ति क्षमणानि च ।**
**स्याल्लघुः प्रथमे पक्षे मध्येन्त्ये योगभंजने ॥ ३८ ॥**

सप्रतिक्रमणं—प्रतिक्रमणया सहितं । मूलं—पंचकल्याणं । तावन्ति—तत्प्रमाणानि । क्षमणानि च—उपवासाश्च । स्यात्—भवेत् । लघुः—लघुमासः । प्रथमे पक्षे—आद्ये पंचदशरात्रे । मध्ये—मध्यकाले । अन्त्ये—अन्ते भवोऽन्त्यस्तस्मिन्नन्त्ये चरमे पक्षे । योगभंजने—योगभंगे । वर्षासु राविद्धर ( ? ) देशभंगादिकारणाद्योगे भग्ने सति प्रथमपक्ष एव सोपस्थानं मासिकं प्रायश्चित्तं भवति । प्रथमपक्षार्धे यावन्तो दिवसा तिष्ठन्ति तावन्त उपवासाः प्रायश्चित्तं । ततोऽन्त्ये काले पक्षे शेषे भिन्ने सति लघुमासः प्रायश्चित्तं भवति ॥ ३८ ॥

**जानुदघ्ने तनूत्सर्गः क्षमणं चतुरंगुले ।**
**द्विगुणा द्विगुणास्तस्मादुपवासाः स्युरम्भसि ॥ ३९ ॥**

जानुदघ्न—जानुमात्रे । अंभसि—। तनूत्सर्गः—कायोत्सर्गः । क्षमणं—उपवासः प्रायश्चित्तं तस्य । चतुरंगुले—चतुरंगुलप्रमाणे सति । द्विगुणा द्विगुणास्तस्मात्—ततः । उपवासाः—क्षमणानि । स्युः—भवेयुः । अंभसि पानीये मध्येन गतस्य सतः कायोत्सर्गः प्रायश्चित्तं भवति । ततश्चतुरंगुले

पानीये गतस्य उपवासः । ततः परं चतुरंगुले चतुरङ्गुले जले सति द्विगुणा द्विगुणा उपवासा भवन्ति ॥ ३९ ॥

**दण्डैः षोडशभिर्मेये भवन्त्येते जलेऽञ्जसा ।**
**कायोत्सर्गोपवासास्तु जन्तुकीर्णे ततोऽधिकाः ॥ ४० ॥**

दण्डैः—चतुर्हस्तप्रमाणैः । षोडशभिर्मेये–षोडशभिर्दण्डैर्मेये परिच्छेद्याः । भवन्ति–सन्ति । एते–इमे प्रागुक्ताः । जले–पानीये । अंजसा–परमार्थेन स्फुटं । कायोत्सर्गोपवासाः–कायोत्सर्गा उपवासाश्च सन्ति । जन्तुकीर्णे–तु, जन्तुकीर्णे पुनः प्राणिगणसंभृते सति । ततः—तेभ्यः कायोत्सर्गोपवासेभ्यः । अधिकाः—प्रवृद्धाः । षोडशदण्डप्रमाणे पानीये मध्येन गतस्य साधोः पूर्वोक्ताः कायोत्सर्गोपवासा भवन्ति न न्यूने । सजन्तुके तु ततोऽभ्यधिकाश्च पूर्वोद्दिष्टप्रायश्चित्तप्रमाणकायोत्सर्गोपवासेभ्यः सकाशात् सातिरेकाः सातिरेकाः कायोत्सर्गोपवासा भवन्तीत्यर्थः ॥ ४० ॥

**स्वपरार्थप्रयुक्तैश्च नावाद्यैस्तरणे सति ।**
**स्वल्पं वा बहु वा दद्याज्ज्ञातकालादिको गणी ॥ ४१ ॥**

स्वपरार्थप्रयुक्तैश्च—स्वार्थमात्मनि निमित्तं, परार्थमन्यजनहेतोः, प्रयुक्तैः प्रेरितैः प्रयोजितैः । नावाद्यैः—द्रोणीप्रभृतिभिः कृत्वा । तरणे—जले उत्तरणे । सति—विद्यमाने । स्वल्पं—स्तोकं कायोत्सर्गं । बहु वा–अथवा भूयोपि । दद्यात्—प्रयच्छेत् । ज्ञातकालादिकः–अवमितकालादिकः कालमवबुद्ध्य प्रायश्चित्तं वितरति । गणी —आचार्यः ॥ ४१ ॥

**दक्षेण गणिना देयं जलयाने विशोधनम् ।**
**साधूनामपि चार्याणां जलकेलिमहासृणिः ॥ ४२ ॥**

दक्षेण—कुशलेन । गणिना—आचार्येण । देयं—दातव्यं । जलयाने पानीयगमने । विशोधनं–प्रायश्चित्तं । साधूनां—यतीनां । अपि चार्याणां–

---

१ अस्य स्थाने केलि इति पाठः पुस्तके ।

अपि च संयतिकानां च । जलकेलिमहासृणिः—जलकेलिः जलक्रीडा तस्या विनिवारणे महासृणिश्च तस्य प्रायश्चित्तं नाम ॥ ४१ ॥

**युग्यादिगमने शुद्धिं द्विगुणां पथिशुद्धितः ।**
**ज्ञात्वा नृजातं वाचार्यो दद्यात्तद्दोषघातिनीम् ॥ ४३ ॥**

युग्यादिगमने—युग्ययानादिप्रयाणे । अस्य [वि] शुद्धिं—प्रायश्चित्तं । द्विगुणां–द्विः ( ? ) । पथिशुद्धितः—पथः शुद्धिः पथिशुद्धिस्तस्याः पथिशुद्धितः मार्गगमनप्रायाश्चित्तात् सकाशात् । ज्ञात्वा—अवबुद्ध्य । नृजातं–पुरुषजातसामान्यं मन्दग्लानादिकं । आचार्यो—गणेन्द्रः । दद्यात्–प्रयच्छेत् । तद्दोषघातिनीं—तस्य पुरुषस्य दोषघातिनीं, अथवा स चासौ दोषश्च तद्दोषस्तस्य घातिनीं शीलां विनाशिकां शुद्धिं । वर्त्मगमने यत्प्रायश्चित्तं प्राग्विनिश्चित्तं तदेव दोलिकादिगमने कथंचित्सम्पन्ने सति द्विगुणं भवतीति योज्यम् ॥ ४३ ॥

**सप्तपादेषु निष्पिच्छः कायोत्सर्गाद्विशुद्ध्यति ।**
**गव्यूतिगमने शुद्धिमुपवासं समश्नुते ॥ ४४ ॥**

सप्तपादेषु—सप्तसु पादेषु गमने सति । निष्पिच्छः—प्रतिलेखविरहितः साधुः । कायोत्सर्गात्–तनूत्सर्गात्प्रायश्चित्तात् । विशुद्ध्यति—निर्दोषो भवति । गव्यूतिगमने—क्रोशमात्रप्रयाणे सति निष्पिच्छः । शुद्धिं प्रायश्चित्तं । उपवासं–क्षमणं । समश्नुते—प्राप्नोति । द्विगुणमित्यधिकारात्क्रोशादनन्तरं प्रतिक्रोशं द्विगुणां द्विगुणां शुद्धिं समश्नुते इति व्याख्यातव्यम् ॥ ४४ ॥

ईर्यासमितिः ।

---

**भाषासमितिमुन्मुच्य मौनं कलहकारिणः ।**
**क्षमणं च गुरूद्दिष्टमपि षट्कर्मदेशिनः ॥ ४५ ॥**

भाषासमितिमुन्मुच्य–भाषासंयमं उन्मुच्य परिहृत्य व्यतिक्रम्य। मौनं कलहकारिण:–कलिविधायिनः मुनेः, मौनं वाचंयमत्वं वाक्संयमः प्रायश्चित्तं भवति। क्षमणं च गुरूद्दिष्टमपि [स्यात्] गुरुद्दिष्टमाचार्योद्दिष्टमपि। षट्कर्मदेशिनः–-षट्कर्मदेशिनो हि प्रायश्चित्तमपि, वाणिज्यविद्योपदेशिनः षड्जीवनिकायबाधाभिः कर्मोपदेशिनो वापि क्षमणं प्रायश्चित्तं भवति ॥ ४५ ॥

**असंयमजनज्ञातं कलहं विदधाति यः।**
**बहूपवाससंयुक्तं मौनं तस्य वितीर्यते ॥ ४६ ॥**

असंयमजनज्ञातं—मिथ्यादृष्टिलोकावबुद्धं। कलहं—कलिं। विदधाति—करोति। यः—साधुः। बहूपवाससंयुक्तं—भूरिक्षमणसमन्वितं। मौनं—वाचंयमत्वं। तस्य–साधोः। वितीर्यते–दीयते ॥ ४६ ॥

**कलहेन परीतापकारिणः मौनसंयुताः।**
**उपवासा मुनेः पंच भवन्ति नृविशेषतः ॥ ४७ ॥**

कलहेन—कलिना कृत्वा। परीतापकारिणः—सन्तापविधायिनः। मौनसंयुताः—वाचंयमत्वोपलक्षिताः। उपवासाः—क्षमणानि। मुनेः—साधोः। पंच—पंचोपवासाः। भवन्ति—सन्ति। नृविशेषतः—पुरुषविशेषात्। मन्दग्लानादिपुरुषविशेषमगवगम्य देयाः ॥ ४७ ॥

**जनज्ञातस्य लोचस्य बहुभिः क्षमणैः सह।**
**आषण्मासं जघन्येन गुरूद्दिष्टं प्रकर्षतः ॥ ४८ ॥**

जनज्ञातस्य—सकललोकावगतस्य कलहस्य सतः। लोचस्य[1]—वालोत्पाटस्य भवति। बहुभिः—भूरिभिः। क्षमणै—रुपवासैः। सार्धं—समं। आषण्मासं जघन्येन—जघन्येन सर्वतः स्तोककालेन आषण्मासं एकोपवासादिषण्मासपर्यन्तं प्रायश्चित्तं। गुरूद्दिष्टं प्रकर्षतः—-प्रकर्षेणोत्कर्षेण गुरूद्दिष्टमाचार्योपदिष्टं भवति ॥ ४८ ॥

---

१ अस्य स्थाने पुस्तके लोचश्चेति पाठः, किन्तु मूले लोचस्येति

**हस्तेन हन्ति पादेन दण्डेनाथ प्रताडयेत् ।**
**एकाद्यनेकधा देयं क्षमणं नृविशेषतः ॥ ४९ ॥**

हस्तेन—करेण । हंति—ताडयति । पादेन—चरणेन । दण्डेन—लकुटेन । अथ—अथवा । प्रताडयेत्—हंति । यदि साधुः कथमपि तदा, एकादि--एकप्रभृति । अनेकधा—अनेकप्रकारं । क्षमणं—उपवासः । देयं—दातव्यं । नृविशेषतः—पुरुषविशेषेण ॥४९ ॥

**यश्च प्रोत्साह्य हस्तेन कलहयेत् परस्परं ।**
**असंभाष्योऽस्य षष्ठं स्यादाषण्मासं सुपापिनः ॥ ५० ॥**

यश्च—योऽपि यतिरूपः । प्रोत्साह्य—प्रचोद्य । हस्तेन–करेण । कलहयेत्–कलहं कारयेत् । परस्परं–अन्योन्यं । सः, असंभाष्यो–नभिलाप्यः । अस्य—एतस्य । षष्ठं–प्रायश्चित्तं । स्यात्–भवेत् । आषण्मासं—षण्मासपर्यन्तं । सुपापिनः–पापिष्ठस्य ॥ ५० ॥

**छिन्नापराधभाषायामप्यसंयतबोधने ।**
**नृत्यगायेति चालापेऽप्यष्टमं दण्डनं मतम् ॥ ५१ ॥**

छिन्नापराधभाषायां—कृतप्रायश्चित्तस्य दोषस्य पुनः परिभाषणे कृते सति । अप्यसंयतबोधने—सुप्तस्यासंयतस्य विरतस्योत्थापनेऽपि । नृत्यगायेति चालापे—नृत्यनटगाय आलापय ( ? ) इति एवमपि आलापे निगदिते । चशब्दात् व ( न ) र्तने च गाने च । अष्टमं—त्रयउपवासाः निरन्तराः । दण्डनं—प्रायश्चित्तं । मतं—इष्टम् ॥ ५१ ॥

**चतुर्वर्णापराधाभिभाषिणः स्यादवन्दनः ।**
**असंभाष्यश्च कर्तव्यः स गाणं गणिकोऽपि च ॥ ५२ ॥**

चतुर्वर्णापराधाभिभाषिणः—चतुर्वणः ऋषिवर्णः ऋषिमुनियत्यनगाराः साध्वार्याश्रावकश्राविका वा तस्यापराधं दोषं अभिभाषते इत्येवं शीलः साधुः । स्यात्—भवेत् । अवन्दनः—अवन्द्यः । असंभाष्यश्च—अनभि-

लाप्यश्च । कर्तव्यः—करणीयः पुरुषः । गाणं गणकोऽपि च—गाणं गणिकश्च कर्तव्यः गाणं गणको नाम तस्माद्गणान्निर्घाटनीयः । पुनरस्मादपि भूयोऽन्यतोऽपि उद्वासयितव्यः । ततो यदि पश्चात् तापसन्तापचित्तः सन्नेवं प्रणिगदति यथा भगवन् ! मम प्रायश्चित्तं ददतेति । ततश्चातुर्वर्ण्यश्रमणसंघमध्ये तस्य विशुद्धिर्विधेयेति ॥ ५२ ॥

भाषासमितिः ।

---

अज्ञानाद्व्याधितो दर्पात् सकृत्कन्दाशनेऽसकृत् ।
कायोत्सर्गः क्षमा क्षान्तिः पंचकं मासमूलके ॥ ५३ ॥

अज्ञानात्—मोहात् । व्याधितो—व्याधे रोगात् । दर्पात्—अहंकाराद्धेतोः । सकृत्—एकवारं । कन्दाशने—कन्दा आई(र्द्र)ककंदादयः, इह कन्दग्रहणमुपलक्षणार्थं, आदिशब्दो वात्र लुप्तनिर्दिष्टः, तेन कन्दफलबीजमूलाद्यप्रासुकं संगृहीतं भवति । तत्र कन्दा सूरणपिण्डालुरताल्वादयः, फलानि आम्रप्रमुखबीजपूरकादीनि, बीजानि गोधूममुद्गमाषराजमाषादीनि, मूलानि सौंभाजनकैरंडमूलादीनि तेषामशने भक्षणे कृते सति । असकृत्—अनेकवारं च । कायोत्सर्गः—तनूत्सर्गः । क्षमा—क्षमणं । क्षान्तिः—उपवासः । पंचकं—कल्याणकं । मासमूलके—मासः मासिकं, मूलं पुनर्दीक्षा । आगममजानानः अप्रासुकमिति वा । अनवबुद्ध्यमानो यदि कन्दमूलाद्यभ्यवहरति तदा सकृत्कायोत्सर्गः प्रायश्चित्तं भवति । असकृदुपवासः । जानन्नपि व्याधिबाधितः सन् परिखादति तदानीं सकृदुपवासः । असकृत्पंचकं लभते । निःशंकः सन् समुत्पाद्य संछिद्य कन्दमूलादि रसायनादिनिमित्तमत्ति तदा सकृन्मासिकं । असकृत्साभोगेन मूलं प्रायश्चित्तमवाप्नोति । अथवा ज्ञाने सकृदत्यन्तस्तोके आलोचना, अन्यत्र कायोत्सर्गः ॥ ५३ ॥

कुड्याद्यालम्ब्य निष्ठ्यूय चतुरङ्गुलसंस्थितिम् ।
त्यक्त्वोक्त्वा क्षमणं ग्लाने भुक्ते षष्ठं तथा परे ॥ ५४ ॥

कुड्यं—भित्तिः, आदिशब्देन स्तंभप्रभृति च । आलम्ब्य—आश्रित्य । निष्ठूय—निष्ठीवनं विधाय । चतुरंगुलसंस्थितिं त्यक्त्वा—चतुरंगुलान्तारितपादविन्यासं चोन्मुच्य । उक्त्वा—निगद्य भुक्ते सति । क्षमणं—उपवासः । ग्लाने—च, पवासादिपरिपीडिते पुरुषे । भुक्ते—भुक्तवति प्रायश्चित्तं भवति । षष्ठं तथा परे—तथा तेनैव न्यायेन, परे परस्मिन् अग्लाने पुरुषे पूर्वोक्तविधानेन भुक्ते सति, षष्ठं प्रायश्चित्तं भवति ॥ ५४ ॥

**काकादिकान्तरायेऽपि भग्ने क्षमणमुच्यते ।**
**गृहीतावग्रहे त्यागः सर्वं भुक्तवतः क्षमा ॥ ५५ ॥**

काकादिकान्तरायेऽपि भग्ने—काकामेध्यच्छर्दिरोधरुधिरावलोकनाश्रुपातादिकान्तराये भग्ने खंडिते सति । क्षमणं—उपवासप्रायश्चित्तं । उच्यते—ऽभिधीयते । गृहीतावग्रहे—उपात्तनिवृत्तौ च भंगे सति । त्यागः—कृतनिवृत्तेर्वस्तुनः भोजने क्रियमाणे सति पुनः संस्मृतेः त्यागः तद्भोजनपरिहार एव प्रायश्चित्तं । सर्वं भुक्तवतः—सर्वमाहारं भुक्तस्य सतः । क्षमा—उपवासो दण्डो भवति ॥ ५५ ॥

**महान्तरायसंभूतौ क्षमणेन प्रतिक्रमः ।**
**भुज्यमानेक्षते शल्ये षष्ठेनाष्टमतो मुखे ॥ ५६ ॥**

महान्तरायसंभूतौ—महान्तरायसंभवे अस्थिसंसक्तान्नसंसेवने सति । क्षमणेन—उपवासेन सह । प्रतिक्रमः—प्रतिक्रमणप्रायश्चित्तं भवति । भुज्यमाने—अद्यमाने ओदनादौ विषयभूते । ईक्षिते—दृष्टे सति । शल्ये—अस्थि (?) । षष्ठेन षष्ठप्रायश्चित्तेन सह प्रतिक्रमः । अष्टमतः अष्टमेन सह प्रतिक्रमः प्रायश्चित्तं भवति । मुखे—आस्ये सति । इह शल्यग्रहणमुपलक्षणार्थं । अतः सार्द्रचर्मरुधिरादावप्येवमेव प्रायश्चित्तं भवति ॥ ५६ ॥

**आधाकर्मणि सव्याधेर्निर्व्याधेः सकृदन्यतः ।**
**उपवासोऽथ षष्ठं च मासिकं मूलमेव च ॥ ५७ ॥**

आधाकर्मणि—आधानमाधा अध्यारोपः तस्याः कर्म क्रिया तस्मिन्नाधाकर्मणि षड्जीवनिकायवधविधानाभिसन्धिपूर्वकं स्वतः स्वभावादेव निष्पन्नान्नपाने। सव्याधेः—सरोगस्य। निर्व्याधेः—नीरोगस्य। सकृत्—एकवारं। अन्यतः—अन्यस्मात् असकृदित्यर्थः। उपवासः—क्षमणं। अथा—नन्तरं। षष्ठं—प्रायश्चित्तं। मासिकं—पंचकल्याणं। मूलमेव च—पुनर्दीक्षा। व्याध्यधीनत्वात्सकृदाधाकर्मणि भुक्ते सति उपवासप्रायश्चित्तं भवति। असकृत् षष्ठं। निर्व्याधिना सकृदाधाकर्मणि भुक्ते मासिकं। असकृत्सर्वकालं षड्जीवनिकायानामाबाधामाधाय भुक्ते सति मूलमेव प्रायश्चित्तं भवति॥ ५७॥

**स्वाध्यायसिद्धये साधुर्यद्युद्देशादि सेवते।**
**प्रायश्चित्तं तदा तस्य सर्वदैव प्रतिक्रमः॥ ५८॥**

स्वाध्यायसिद्धये—स्वाध्यायाय भवति निमित्तं (पठननिमित्तं)। साधुरपि। यदि—चेत्। उद्देशादि—उद्देशकादिदोषजातं। सेवते—अनुभवति। प्रायश्चित्तं—विशुद्धिः। तदा—तदानीं। तस्य—उद्देशादिनिषेविणः। सर्वदैव—सर्वकालमपि। प्रतिक्रमः—प्रतिक्रमणं। इहापि प्रतिक्रमो नियम इति वेदितव्यः॥ ५८॥

**एकं ग्रामं चरेद्भिक्षुर्गन्तुमन्यो न कल्पते।**
**द्वितीयं चरतो ग्रामं सोपस्थानं भवेत्क्षमा॥ ५९॥**

एकं ग्रामं—एकं नगरादिसन्निवेशं। चरेत्—चरति भिक्षार्थं पर्यटति। भिक्षुः—यतिः। गन्तुमन्यो न कल्पते—एकस्मिन् ग्रामे चर्यार्थं पर्यट्य तस्मिन्नेव दिवसे भिक्षार्थं द्वितीयो ग्रामं गन्तुं न कल्पते नोचितः। द्वितीयं—अन्यं। चरतो—भ्रमतः ग्रामं। सोपस्थानं—सप्रतिक्रमणा। भवेत्—स्यात्। क्षमा—क्षमणम्॥ ५९॥

**स्वाध्यायरहिते काले ग्रामगोचरगामिनः।**
**कायोत्सर्गोपवासौ हि यथाक्रममनूदितौ॥ ६०॥**

स्वाध्यायरहिते—स्वाध्यायवर्जिते । काले-समये स्वाध्यायकाले स्वाध्यायक्रियामागमाध्ययनं वाविधाय । ग्रामगोचरगामिनः—ग्रामगामिनः गोचरगामिनश्च व्याध्युपवासादिकारणात् भिक्षार्थं प्रविष्टस्य सतः साधोः । कायोत्सर्गोपवासौ—ग्रामान्तरगतस्य कायोत्सर्गः । चर्यार्थं प्रविष्टस्योपवासः प्रायश्चित्तं भवतीति यथाक्रममभिसम्बन्धः ॥ ६० ॥

एषणासमितिः ।

---

**काष्ठादि चलयेत् स्थानं क्षिपेद्वापि ततोऽन्यतः ।**
**कायोत्सर्गमवाप्नोति विचक्षुविषये क्षमा ॥ ६१ ॥**

काष्ठादि—दारूपलतृणकर्परप्रमुखं वस्तु । चलयेत्—कंपयति । स्थानात्—प्रदेशात् । क्षिपेद्वापि ततोऽन्यतः—ततस्तस्मात्स्थानात्, क्षिपेद्वा विसृजेद्वा, अन्यतोऽन्यस्मिन् प्रदेशे तदा । कायोत्सर्ग—तनूत्सर्ग । अवाप्नोति—लभते । अचक्षुर्विषये—अदृष्टिगोचरे । क्षमा—क्षमणं प्रायश्चित्तम् ॥ ६१ ॥

आदाननिक्षेपणासमितिः ।

---

**ऊर्ध्वं हरिततृणादीनामुच्चारादिविसर्जने ।**
**कायोत्सर्गो भवेत् स्तोके क्षमणं बहुशोऽपि च ॥ ६२ ॥**

ऊर्ध्वं—उपरि । हरिततृणादीनां—हरिततृणमच्छतृणं, आदिशब्देन बीजाङ्कुरशिलभेदपृथ्वीभेदादीनां चोपरिष्टात् । उच्चारादिविसर्जने—मूत्रपुरीषादिमलोज्झने कृते सति । कायोत्सर्गः—तनूत्सर्गः । भवेत्—स्यात् । स्तोके—स्तोकवारे । क्षमणं बहुशोऽपि च बहुवारेषु—च क्षमणमुपवासः प्रायश्चित्तं भवति ॥ ६२ ॥

प्रतिष्ठापनासमितिः ।

---

**स्पर्शादीनामतीचारे निष्प्रमादप्रमादिनाम्।**
**कायोत्सर्गोपवासाः स्युरेकैकपरिवर्द्धिताः ॥ ६३ ॥**

स्पर्शादीनां——स्पर्शरसघ्राणचक्षुःश्रोत्रेन्द्रियाणां। अतीचारे——दोषे अनिरोधे सति। निष्प्रमादप्रमादिनां——निष्प्रामदस्य अप्रमत्तस्य, प्रमादिनः प्रमादवतश्च पुरुषस्य। कायोत्सर्गोपवासाः——कायोत्सर्गा उपवासाश्च। स्युः——भवेयुः। एकैकपरिवार्द्धिताः——एकोत्तरवृद्धिमधिरोपिताः। स्पर्शः कर्कशमृदुगुरुलघुशीतोष्णस्निग्धरूक्षभेदादष्टविधः। रसस्तिक्तकटुककषायाम्लमधुरलवणविशेषात् षड्विधः। गन्धो द्विविधः सुरभिरसुरभिश्च। रूपं पंचप्रकारं कृष्णनीलपीतशुक्लोहिताविशेषात्। शब्दः षडर्षभगान्धारमध्यमपंचमधैवतनिषादविशेषतः सप्तप्रकारः। तेषु विषये दोषविशेषविशुद्धिरियं भवति। अप्रमत्तस्यैकोत्तरवृद्ध्यादिकायोत्सर्गा भवन्ति——स्पर्शे एकः कायोत्सर्गः, रसे द्वौ, घ्राणे त्रयः, चक्षुषि चत्वारः, श्रोत्रे पंच। प्रमत्तस्योपवासा भवन्ति——स्पर्शे एक उपवासः, रसे द्वौ, घ्राणे त्रयः, चक्षुषि चत्वारः, श्रोत्रे पंच उपवासा इति ॥ ६३ ॥

इन्द्रियनिरोधम्।

---

**वन्दनानियमध्वंसे कालच्छेदे विशोषणम्।**
**स्वाध्यायस्य चतुष्केऽपि कायोत्सर्गो विकालतः ॥ ६४ ॥**

वन्दनानियमध्वंसे——वन्दना अर्हदादीनामभिवादः, नियमो दैवसिकादिप्रतिक्रमणं, तयोः ध्वंसे विनिपाते सति, पूर्वाह्णमध्यान्हापराह्णदेववन्दनादिविरहे रात्रिगोचरादिनियमवर्जने च। कालच्छेदे——स्वकालातिक्रमे च। विशोषणं——विशोषः उपवासः प्रायश्चित्तं भवति। स्वकालश्च वन्दनायाः सन्ध्याकालः, दैवसिकनियमस्यादित्यबिम्बार्द्धास्तमनात्पूर्वमेव प्रारम्भः रात्रिनियमस्य प्रभास्फोटात्प्रागेव परिसमापनं। स्वाध्यायस्य चतुष्केऽपि——

स्वाध्यायस्य चतुष्टये च विषये ध्वंसे सति विशोषणं प्रायश्चित्तं भवति। कायोत्सर्गो विकालतः—विकालतः विकालात् स्वाध्यायस्य कालविच्छेदे सति कायोत्सर्गः प्रायश्चित्तं। स्वाध्यायस्य कालोऽपि दिवसे पूर्वाह्णे घटिकात्रये सति, अपराह्णेऽन्त्यनाडिकात्रयात्पूर्वं, रात्रौ प्रथमभागे नाडीत्रये गते सति, चरमभागेऽन्त्यनाडित्रयात्प्राक् ॥ ६४ ॥

**प्रतिमासमुपोषः स्याच्चतुर्मास्यां पयोधयः।**
**अष्टमासेष्वथाष्टौ च द्वादशाब्दे प्रकीर्तिताः ॥ ६५ ॥**

प्रतिमासं—मासं प्रति। उपोषः—उपोषणं। स्यात्—भवेत्। मासे मासे उपवासोऽवश्यं कर्तव्यः। चतुर्मास्यां पयोधयः—चतुर्षु मासेषु गतेषु पयोधयः समुद्राश्चत्वार उपवासा अवश्यं कर्तव्याः। अष्टमासेष्वथाष्टौ च—अष्टमासेषु अष्टसु मासेषु, अथ अनन्तरं, अष्टौ च अष्ट उपवासा विधातव्याः। द्वादशाब्दे—अब्दे वर्षे द्वादश उपवासाः करणीयाः। प्रकीर्तिताः—कथिताः ॥ ६५ ॥

**पक्षे मासे कृतेः षष्ठं लंघने सप्रतिक्रमम्।**
**अन्यस्या द्विगुणं देयं प्रागुक्तं निर्जरार्थिनः ॥ ६६ ॥**

पक्षे मासे—पक्षे पंचदशरात्रे, मासे त्रिंशद्रात्रे च विषये या कृतिः क्रिया प्रतिक्रमणा तस्याः लंघने सकृत् सति। षष्ठं—षष्ठोपवासः प्रायश्चित्तं भवति। लंघने—अतिक्रमणे। सप्रतिक्रमं—प्रतिक्रमणया सह। अन्यस्याः—परस्याः चातुर्मास्याः सांवत्सरिकायाश्च क्रियायाः लंघने सति। सप्रतिक्रमणं, द्विगुणं—द्विः। देयं—दातव्यं। प्रागुक्तं—पूर्वोपदिष्टं प्रायश्चित्तं। चातुर्मास्याः क्रियाया विलंघने सति अष्टौ उपवासा भवन्ति, सांवत्सरिकायाश्चतुर्विंशतिरुपवासाः सन्ति। निर्जरार्थिनः—कर्मक्षयाभिलाषिणः साधोः ॥ ६६ ॥

आवश्यकम्।

---

**चतुर्मासानथो वर्षं युगं लोचं विलंघयेत्।**
**क्षमा षष्ठं च मासोऽपि ग्लानेऽन्यत्र निरन्तरः॥ ६७॥**

चतुर्मासान्—चतुरो मासान्। अथो—अथवा। वर्षं—संवत्सरं। युगं—पंचवर्षाणि। लोचं—बालोत्पाटं। विलंघयेत्—प्रापयति यदि तदानीं यथाक्रमं, क्षमा—उपवासः। षष्ठं च—षष्ठोपवासः। मासोऽपि—मासिकं चेत्येतानि प्रायश्चित्तानि भवन्ति। ग्लाने—आतुरे। अन्यत्र—अन्यस्मिन् पुरुषे निर्व्याधौ। निरन्तरः—व्यवधानविरहितो मासो विशुद्धिर्भवति॥६७॥

लोचः।

---

**उपसर्गाद्रुजो हेतोर्दर्पेणाचेलभंजने।**
**क्षमणं षष्ठमासौ स्तो मूलमेव ततः परं॥ ६८॥**

उपसर्गात्—स्वजननरेश्वरादिभिः परिगृहीतस्यात्यन्तसंकटपरिपतितस्य यतेः सतः। रुजो—व्याधेः। हेतोः—केनापि निमित्तेन सता रूपपरिवर्ते कृते सति। दर्पेण—गर्वेण चाहंकारं कृत्वा। अचेलभंजने आचेलक्यभंगे कृते यथाक्रममेतानि प्रायश्चित्तानि भवन्ति। क्षमणं—उपवासः। षष्ठमासौ—षष्ठं षष्ठोपवासः, मासो मासिकं च। स्तः—भवतः। मूलमेव ततः परं—ततः परं तदनन्तरं दर्पतः मूलमेवेति नान्यत्प्रायश्चित्तम्॥ ६८॥

आचेलक्यम्।

---

**दन्तकाष्ठे गृहस्थार्हशय्यासंस्नानसेवने।**
**कल्याणं सकृदाख्यातं पंचकल्याणमन्यथा॥ ६९॥**

दन्तकाष्ठे—दन्तधावने कृते सति। गृहस्थार्हशय्यासंस्नानसेवने—गृहस्थार्हाया गृहिजनोचितायाः, शय्यायाः तल्पस्य शयनस्य, संस्नानस्य

---

१ निरन्तरमिति मूल पाठः पुस्तके।

च सेवने भंजने सति। कल्याणं—पंचकं भवति। सकृत्—एकवारं। आख्यातं—अभिहितं। पंचकल्याणं—मासिकं। अन्यथा—अन्येन प्रकारेण असकृदित्यर्थः॥ ६९॥

अस्नानक्षितिशयनदन्तधावनानि।

---

**अस्थित्यनेकसंभुक्तेऽदर्पे दर्पे सकृन्मुहुः।**
**कल्याणं मासिकं छेदः क्रमान्मूलं प्रकाशतः॥ ७०॥**

अस्थित्यनेकसंभुक्ते—संभोजनं भुक्तिः,–अस्थितिरनूर्ध्वभावः तया अस्थित्या संभोजनं, न एकं अनेकं अनेकं च तच्च संभुक्तं चानेकसंभुक्तं अनेक वारभोजनं, तस्मिन्नस्थितिभोजनेऽनेकभक्ते च सति। अदर्पे—अगर्वे। दर्पे—अहंकारे। सकृत्—एकवारं। मुहुः—पुनः। कल्याणं—पंचकं अनहंकारे सकृत्। असकृन्मासिकं। दर्पतः सकृत् प्रव्रज्याच्छेदः। असकृत्, क्रमात्—क्रमेण, मूलं—पुनर्दीक्षा। प्रकाशतः—प्रकाशात् साभोगेन लोकानामवलोकमानानां स्थितिभुक्तैकभक्तमूलगुणयोर्भंगे प्रायश्चित्तं भवति॥ ७०॥

स्थितिभोजनैकभक्ते।

---

**समितीन्द्रियलोचेषु भूशयेऽदन्तघर्षणे।**
**कायोत्सर्गः सकृद्भूयः क्षमणं मूलमन्यतः॥ ७१॥**

समितीन्द्रियलोचेषु—समितिषु ईर्याभाषैषणादाननिक्षेपणप्रतिष्ठापनसमितिषु, इन्द्रियेषु स्पर्शनरसनघ्राणचक्षुःश्रोत्रेषु, लोचे बालोत्पाटे। भूशये—भूमिशयने। अदन्तघर्षणे—अदन्तधावने मूलगुणेषु च। सर्वेष्वेतेषु मूलगुणेषु संक्लेशादिदोषविशेषे समुत्पन्ने सति अतिस्तोके मिथ्याकारः ततोऽधिके स्वनिन्दा, ततोऽपि गर्हा, ततश्चालोचना, ततो लघुकायोत्सर्गः, ततो मध्यमकायोत्सर्गः, ततः प्रवर्धमानस्तावद्यावन्महाकायोत्सर्गोऽष्टोत्तरशतो-

च्छ्वासप्रमाणः । सकृत्-एतदेकवारे प्रायश्चित्तं । भूयः क्षमणं-भूयः पुनः पुनः भंगविशेषे सति पुरुमंडलनिर्विकृत्यैकस्थानाऽऽचाम्लानि भवन्ति तावद्या-वत्सर्वोत्कृष्टभंगे सति क्षमणमुपवासः सोपस्थानं प्रायश्चित्तं भवति । मूल-मन्यतः—अन्यतः अन्येषु मूलगुणेषु पंचमहाव्रतेषु षडावश्यकेषु आचेल-क्येऽस्नाने स्थितिभोजने एकभक्त इत्येतेषु सर्वेषु भंगे सकृत् सोपस्थानं क्षमणं प्रायश्चित्तं भवति । तदेवासकृदहंकाराप्रयत्नास्थिरादिषु पुरुष-विशेषात्प्रवर्धमानं षष्ठाष्टमदशमद्वादशोपवासार्धमासमासोपवासषण्माससंव-त्सरादि ततो भवति, तदनन्तरं दीक्षाच्छेदो दिवसादिप्रायश्चित्तं, ततः सर्वोत्कृष्टं मूलं विशुद्धिर्भवति ॥ ७१ ॥

मूलगुणाः ।

---

**द्रुमूलातोरणौ स्थास्नू आतापस्तद्द्वयात्मकः ।**
**चलयोगा भवन्त्यन्ये योगाः सर्वेऽथवा स्थिराः ॥ ७२ ॥**

द्रुमूलातोरणौ स्थास्नू—द्रुमूलो द्रुममूलः वृक्षमूलो योगः, अतोरणोऽतो-रणयोगश्चैतौ द्वावपि योगविशेषौ, स्थास्नू स्थिरौ स्थिरयोगौ भवतः । आता-पस्तद्द्वयात्मकः—आतापः आतापनयोगः । तद्द्वयात्मकः चरास्थिरस्वभावो भवति चरोऽपि भवति स्थिरश्च भवति । अस्मिन् देशकाले मयातापनयो-गोऽवश्यं विधेय इत्यभिसन्धिनियमितः स्थिरः तद्विपरीतश्चल इति । चल-योगाः—चलयोगविशेषाः । भवन्ति—सन्ति । अन्ये—परेऽभ्रावकाशस्था-नमौनादिकाः । योगाः सर्वेऽथवा स्थिराः—अथवान्येन प्रकारेण, सर्वेऽपि निर्विशेषाश्च, योगास्तपोविधयः, स्थिरा ध्रुवा अपरिहार्यत्वात् आतत्परिस-माप्तेः ॥ ७२ ॥

**भंजने स्थिरयोगानां नमस्कारादिकारणात् ।**
**दिनमानोपवासाः स्युरन्येषामुपवासना ॥ ७३ ॥**

भंजने—भंगे सति। स्थिरयोगानां—ध्रुवयोगानां। नमस्कारादिकारणात्—वृक्षमूलादियोगे परिगृहीते सति अत्यन्तमक्षिकुक्षिशिरःशूलविसूचिकासर्पोपसर्गादिकारणवशात् कर्णेजपभेषजप्रभूतनिमित्तात्। दिनमानोपवासः—दिनमानेन दिवसप्रमाणेन, योगभंगे संजाते सति यावन्तोऽद्यापि योगदिवसाः समवतिष्ठन्ते तावन्त उपवासाः। स्युः—भवेयुः। अन्येषां—अपरेषां स्थानमौनावग्रहादीनां योगानां भंगे कथंचित् संजाते सति आलोचनादि प्रायश्चित्तं भवति तावद्यावत्, उपवासनं—उपवासः सोपस्थानो भवति ॥ ७३ ॥

**तत्प्रतिष्ठा च कर्तव्याभ्रावकाशे पुनर्भवेत्।**
**चतुर्विधं तपश्चापि पंचकल्याणमन्तिमम् ॥ ७४ ॥**

तत्प्रतिष्ठा च—तेषु स्थानमौनावग्रहादिषु योगेषु प्रतिष्ठा च पुनर्व्यवस्थापनमपि। कर्तव्या—करणीया, प्रायश्चित्तं प्रदाय पुनरपि तत्रैव योगे स्थापयितव्य इत्यर्थः। अभ्रावकाशे पुनः—बहिःशयने तु। भवेत्—स्यात्। चतुर्विधं—चतुष्प्रकारं प्रायश्चित्तं आलोचना प्रतिक्रमणं उभयं विवेकः, स च द्विविधः स्थानविवेको गणविवेकश्च। अन्तिम इत्येवमष्टमं भवति, तपस्वी ( तपश्चापि )—उपवासाद्यपि भवति पुरुमंडलनिर्विकृत्येकस्थानाचाम्लक्षमणकल्याणषष्ठाष्टामदशमद्वादशादि तावद्यावत्, पंचकल्याणं—मासिकं। अन्तिमं—पश्चिमं भवति ॥ ७४ ॥

**सकृदप्रासुकासेवेऽसकृन्मोहादहंकृतेः।**
**क्षमणं पंचकं मासः सोपस्थानं च मूलकम् ॥ ७५ ॥**

सकृत्—एकवारं। अप्रासुकासेवे—त्रसस्थावराद्युपहतवसतिप्रभृतिप्रदेशसंसेवने सति। असकृत्—अनेकवारं। मोहात्—स्नेहात् अज्ञानतः। अहंकृतेः—अहंकारात् दर्पात्। क्षमणं—मोहात् स्तोककाले उपवासः प्रायश्चित्तं भवति। बहुशः, पंचकं—कल्याणं। दर्पात् स्तोककाले,

मासः—पंचकल्याणं सोपस्थानं—सप्रतिक्रमणं भवति । बहुशो वसतिसमारंभग्रामक्षेत्रादिचिन्ताभिधायिनो, मूलं—प्रायश्चित्तं भवति ॥ ७५ ॥

**ग्रामादीनामजानानो यः कुर्यादुपदेशनम् ।**
**जानन् धर्माय कल्याणं मासिकं मूलगः स्मये ॥ ७६ ॥**

ग्रामादीनां—ग्रामपुरखेटकर्वटमटंबगृहवसतिप्रभृतिसन्निवेशानां । अजानानः—दोषमनवबुद्ध्यमानः सन् । यो—यतिः । कुर्यात्—विदधाति । उपदेशनं—उपदेशं । जानन्—अवगच्छन्नपि । धर्माय—धर्मार्थं उपदेशं यदि वितनुते तदानीं अजानाने कल्याणं । धर्मकारणे, मासिकं—पंचकल्याणं प्रायश्चित्तं गच्छतीति । मूलगः—मूलं प्रायश्चित्तं गच्छतीति मूलगः । स्मये—गर्वे सति । यदि दर्पेण ग्रामाद्युपदेशनं करोति तदा मूलं प्रायश्चित्तं समश्नुते ॥ ७६ ॥

**आलोचना तनूत्सर्गः पूजोद्देशेऽप्रबोधने ।**
**सोपस्थाना सकृद्देया क्षमा कल्याणकं मुहुः ॥ ७७ ॥**

आलोचना— गुरुभ्यः स्वदोषविनिवेदनं । तनूत्सर्गः—कायोत्सर्गः । पूजोद्देशे—पूजोपदेशने कृते सति । अप्रबोधने—अज्ञे पुरुषे । सोपस्थाना सकृद्देया—आरंभपरिमाणं परिज्ञाय आलोचना वा कायोत्सर्गो वा तावद्यावत्, क्षमा—क्षमणं, सोपस्थाना सप्रतिक्रमणा, सकृदेकदिवसेषु, देया दातव्या । कल्याणकं मुहुः—मुहुः पुनः पुनर्यदि पूजाविधानं देशयति तदानीं कल्याणपंचकं प्रायश्चित्तं दातव्यं भवति ॥ ७७ ॥

**जानानस्यापि संशुद्धिः सकृच्चासकृदेव च ।**
**सोपस्थानं हि कल्याणं मासिकं मूलमावधे ॥ ७८ ॥**

जानानस्यापि दोषमवगच्छतोऽपि पुरुषस्य पूजोपदेशे सति । संशुद्धिः—प्रायश्चित्तं भवति । सकृत्—एकवारं । असकृदेव च—अनेकवारमपि । सोपस्थानं हि कल्याणं—सकृत्सोपस्थानं सप्रतिक्रमणं, हि स्फुटं, कल्याणपंचकं

भवति । असकृत्, मासिकं—पंचकल्याणं । मूलं—पुनर्दीक्षा भवति । आवधे आ समन्तात् वधे षड्जीवनिकायानां महारम्भे सति ॥ ७८ ॥

**सल्लेखनेतरे ग्लाने सोपस्थाना विशोषणा ।**
**अनाभोगेऽथ साभोगे प्रभुक्ते मासिकं स्मृतम् ॥ ७९ ॥**

सल्लेखनेतरे ग्लाने—संन्यासे प्रतिष्ठितः सन् यदि क्षत्तृट्परीषहविबाधितस्तस्मिन् इतरे, ग्लाने सामान्येनाष्टोपवासपक्षोपवासमासोपवासप्रमुखोपवासविशेषपरिपीडितैस्तस्मिंश्च प्रभुक्ते सति । सोपस्थाना—सप्रतिक्रमणा । विशोषणा—उपवासः । अनाभोगे—केनचिदविज्ञाते सति । अथ—अथवा । साभोगे—लोकैः समवबुद्धिः ( द्धे ) । प्रभुक्ते—भोजने सति । मासिकं—पंचकल्याणं स्मृतम् ॥ ७९ ॥

**स्यात् सम्यक्त्वव्रतभ्रष्टैर्विहारे मासिकं क्षमा ।**
**जिनादीनामवर्णादौ सोपस्थानाङ्गसंस्कृते ? ॥ ८० ॥**

स्यात्—भवेत् । सम्यक्त्वव्रतभ्रष्टैः—सम्यक्त्वपरिच्युतैः पुरुषैः सह, व्रतभ्रष्टैः दुःशीलताक्रोधमानमायालोभाविनयसंघायशस्कारादित्वादिदोषविशेषदूषितव्रतैश्च सह । विहारे—विहरणे भ्रमणे आचरणे कृते सति । मासिकं—पंचकल्याणप्रायश्चित्तं भवति । क्षमा जिनादीनामवर्णादौ—जिनादीनामर्हत्सिद्धाचार्योपाध्यायसाधूनां, अवर्णादौ असद्दोषाभिभाषणाविनय—शंकाकांक्षादौ उपवासः प्रायश्चित्तं भवति ॥ ८० ॥

**निमित्तादिकसेवायां सोपस्थानोपवासनम् ।**
**सूत्रार्थाविनयाद्येष्वङ्गोत्सर्गालोचने स्मृते ॥ ८१ ॥**

निमित्तादिकसेवायां— निमित्तमष्टाविधं । उक्तं च—

वंजणमंगं च सरं छिन्नं भोमं च अंतरिक्खं च ।
लक्खण सिविणं च तहा अट्ठविहं होइ णिम्मितं ॥ इति ।

तस्य आदिशब्देन वैद्यकविद्यामंत्राणामपि उपसेवने समुपजीवने सति ।

सोपस्थानोपवासनं—सोपस्थानं सप्रतिक्रमणं उपवासनमुपवासः प्रायश्चित्तं भवति । सूत्रार्थाविनयाद्येषु—सूत्रं आगमपाठः, अर्थोऽभिधेयं, तयोरविनयाद्येषु अविनयनिन्हवबहुमानक्षेत्रकालाद्यशोधनप्रमुखदोषेषु, अथवा सूत्रार्थमप्रश्नयत्तेत् कथमयमपमर्थो (?) भवद्भिर्निर्णीत इति वैयात्येनोपाददानस्यायं दण्डः । अंगोत्सर्गालोचने—अंगोत्सर्गः कायोत्सर्गः, आलोचना च इत्येते द्वे प्रायश्चित्ते । स्मृते—कथिते ॥ १८१ ॥

**सूत्रार्थदेशने शैक्ष्येऽसमाधानं वितन्वतः ।**
**चतुर्थं निन्हवेऽप्येवमाचार्यस्यागमस्य च ॥ ८२ ॥**

सूत्रार्थदेशने—सूत्रार्थयोर्देशने उपदेशे कथने विशेषभूते शैक्षके । असमाधानं—संक्लेशं । वितन्वतः—कुर्वतः । चतुर्थं—उपवासः प्रायश्चित्तं । निन्हवेऽप्येवं—निन्हवेऽपि निन्हुतौ च । एवं—एवं उपवास एव विशुद्धिर्भवति । आचार्यस्य—गणेन्द्रस्य । आगमस्य च—श्रुतस्यापि ॥ ८२ ॥

**संस्तराशोधने देये कायोत्सर्गविशोषणे ।**
**शुद्धेऽशुद्धे क्षमा पंचाहोऽप्रमादिप्रमादिनोः ॥ ८३ ॥**

संस्तराशोधने—संस्तरस्याशोधनेऽतात्पर्ये सति । देये—दातव्ये । कायोत्सर्गविशोषणे—कायोत्सर्गः तनूत्सर्गः, विशोषणमुपवास इत्येते द्वे । शुद्धे—शुद्धप्रदेशे । अशुद्धे—अप्रासुकप्रदेशे । क्षमा—क्षमणं । पंचाहः—पंचकं । अप्रमादिप्रमादिनोः—अप्रमादिनः प्रमादिनश्च । प्रासुकप्रदेशे प्रसुप्तस्य संस्तरमशोधयतः साधोरप्रमत्तस्य कायोत्सर्गः प्रायश्चित्तं । प्रमादिनः उपवासः । अप्रासुकक्षेत्रे प्रसुप्तस्योपवासोऽप्रमत्तस्यः । ( प्रमत्तस्य ) कल्याणं भवतीति यथासंख्यं योज्यम् ॥ ८३ ॥

**लोहोपकरणे नष्टे स्यात्क्षमाङ्कुलमानतः ।**
**केचिद्धनाङ्कुलैरूचुः कायोत्सर्गः परोपधौ ॥ ८४ ॥**

लोहोपकरणे—अयोमयोपधौ सूचीनखरदनक्षुरप्रमुखे। नष्टे—अपलापिते सति। स्यात्—भवेत्। क्षमा—उपवासः प्रायश्चित्तं। अंगुलमानतः—अंगुलप्रमाणेन। यावन्ति तस्य नष्टलोहोपकरणस्याङ्गुलानि तावन्ति क्षमणानि प्रायश्चित्तं भवति। केचिद्घनाङ्गुलैरूचुः—केचिदाचार्याः घनाङ्गुलैस्तस्य लोहोपकरणस्य घनीकृतस्य यावन्ति अंगुलानि भवन्ति तावान्ति क्षमणानि सन्तीत्यूचुर्जगदुः कथितवन्तः। कायोत्सर्गः परोपधौ—परस्यान्यस्य च(व)क्कलकप्रतिलेखनकमण्डलुप्रभृतेरुपधेरुपकरणस्य नाशे सति कायोत्सर्गः प्रायश्चित्तं भवति॥ ८४॥

**रूपाभिघातने चित्तदूषणे तनुसर्जनम्।**
**स्वाध्यायस्य क्रियाहानावेवमेव निरुच्यते॥ ८५॥**

रूपाभिघातने—आलिखितमनुष्यादिरूपस्य प्रतिबिंबस्य अभिघातने परिमार्जने कृते सति। चित्तदूषणे—विषयाभिलाषादिदुष्परिणामोत्पत्तौ च सत्यां। तनूत्सर्जनं—कायोत्सर्गः प्रायश्चित्तं। स्वाध्यायस्य क्रियाहानौ—स्वाध्यायक्रियां श्रुतभक्तिपूर्वां विधाय आगमपदजनपरिपठनविधानस्य केनचित्कारणेनाऽकरणे सति। एवमेव—पूर्वोक्तक्रमेणैव कायोत्सर्ग एव प्रायश्चित्तं। निरुच्यते—निश्चीयते॥ ८५॥

**योऽप्रियङ्करणं कुर्यादनुमोदेत चाथवा।**
**दूरस्थोऽसौ जिनाज्ञायाः षष्ठं सोपस्थितिं[1] व्रजेत्॥ ८६॥**

यः—यः कश्चित् साधुः। अप्रियङ्करणं—अप्रियकरणमनिष्टविधानं स्वाध्यायनियमवन्दनादिक्रियाणां हीनादिकरणं। कुर्यात्—करोति। अनुमोदेत च—अनुमन्येत च। अथवा—अहोस्वित्। दूरस्थोऽसौ जिनाज्ञायाः—जिनागमात् तत्रस्थो बहिर्भूतः; असौ स साधुः पूर्वोक्तः। षष्ठं सोपस्थितिं व्रजेत्—सोपस्थानं षष्ठं षष्ठप्रायश्चित्तं व्रजेद्गच्छति प्राप्नोति॥ ८६॥

---

१ सोऽपि स्थितिं इति पाठः पुस्तके टीकानुसारेण परिवर्तितः।

**तृणकाष्ठकवाटानामुद्घाटनविघट्टने ।**
**चातुर्मास्याश्चतुर्थं स्यात् सोपस्थानमवस्थितिम् ॥ ८७ ॥**

तृणकाष्ठकवाटानां—तृणकाष्ठकवाटकादीनां वस्तूनां । उद्घाटने—विवरणे च । विघट्टने—सम्बन्धे च कृते सति । चातुर्मास्याः—चतुर्भ्यो मासेभ्योऽनन्तरं । चतुर्थं—उपवासः । स्यात्भवेत् । सोपस्थानं—सप्रतिक्रमणं— । अवस्थितिं—निश्चितं ध्रुवम् ॥ ८७ ॥

**शश्वद्विशोधयेत् साधुः पक्षे पक्षे कमण्डलुम् ।**
**तदशोधयतो देयं सोपस्थानोपवासनम् ॥ ८८ ॥**

शश्वत्—सर्वकालं । विशोधयेत्—अन्तः प्रक्षालयेत् सम्मूर्च्छनानिराकरणाय । साधुः—मुनिः । पक्षे पक्षे—प्रतिपक्षं । कमण्डलुं—जलकुण्डिकां । तदशोधयतः—तत्कमण्डलुं अशोधयतः अनिर्लेपयतः । देयं—दातव्यं । सोपस्थानोपवासनं—सोपस्थानं सप्रतिक्रमणं, उपवासनं उपवासः ॥ ८८ ॥

**मुखं क्षालयतो भिक्षोरुदबिन्दुर्विशेन्मुखे ।**
**आलोचना तनूत्सर्गः सोपस्थानोपवासनम् ॥ ८९ ॥**

मुखं—आस्यं । क्षालयतो—धावयतः सतः । भिक्षोः—साधोः । उदबिन्दुः—उदकबिन्दुः । विशेत्—यदि प्रविशति । मुखे—वक्त्रे । तदानीं आलोचना प्रायश्चित्तं । तनूत्सर्गः—कायोत्सर्गः । सोपस्थानोपवासनं—सोपस्थानं सप्रतिक्रमणं, उपवासनं उपवासः, एतानि प्रायश्चित्तानि भवन्ति ॥ ८९ ॥

**आगन्तुकाश्च वास्तव्या भिक्षाशय्यौषधादिभिः ।**
**अन्योन्यागमनाद्यैश्च प्रवर्तन्ते स्वशक्तितः ॥ ९० ॥**

आगन्तुकाः—प्राघूर्णकाः । वास्तव्याश्च—स्थायिनोऽपि यतयः । भिक्षाशय्यौषधादिभिः—भिक्षा चर्या, शयनं संस्तरः, औषधं भेषजं,

तैः कृत्वा। आदिशब्देन आप्रस्ता (पृच्छा) लोचनाव्याख्यानवात्सल्यसंभाषणादिभिरपि। अन्योन्यागमनाद्यैश्च—परस्परसंकाशं गमनागमनविनयाभ्युत्थानप्रभृतिभिश्च प्रकारैः। प्रवर्तन्ते—चेष्टन्ते। स्वशक्तितः—आत्मशक्त्या सर्वसामर्थ्यात्॥ ९०॥

**विधिमेवमतिक्रम्य प्रमादाद्यः प्रवर्तते।**
**तस्मात् क्षेत्रादसौ वर्षमपनेयः प्रदुष्टधीः॥ ९१॥**

विधिं—विधानक्रमं। एवं—एवंविधं। अतिक्रम्य—उल्लंघ्य। प्रमादात्—शैथल्यात्। यो—यतिः। प्रवर्तते—चेष्टते। तस्मात् क्षेत्रादसौ—असौ स साधुः, तस्मात्ततः, क्षेत्राद्विषयात्सकाशात्। वर्षं—संवत्सरमात्रं कालं। अपनेयः—निर्घाटयितव्यः। प्रदुष्टधीः—दुष्टमतिः॥ ९१॥

**शिलोदरादिके सूत्रमधीते प्रविलिख्य यः।**
**चतुर्थालोचने तस्य प्रत्येकं दण्डनं मतम्॥ ९२॥**

शिलोदरादिके—शिलायां दृषदि पाषाणे, उदरे ऊरौ, आदिशब्देन भूमिबाहुजंघाप्रभृतावपि[1]। सूत्रं—आगमनिबन्धं। अधीते—यतिः। प्रविलिख्य यः—। चतुर्थालोचने—चतुर्थमुपवासः, आलोचना दोषप्रकाशना एते द्वे। तस्य—पुर्वोक्तस्य। प्रत्येकं—यथासंख्यं। दण्डनं—प्रायश्चित्तं। मतं—अभ्युपगतं। शिलातलभूप्रदेशादिषु उपवासः। उदरोरुजंघाबाव्हादिषु आलोचना॥ ९२॥

**जातिवर्णकुलोनेषु भुंक्तेऽजानन् प्रमादतः।**
**सोपस्थानं चतुर्थं स्यान्मासोऽनाभोगतो मुहुः॥ ९३॥**

जातिवर्णकुलोनेषु—जातिर्मातृपक्षः, वर्णाः ब्राह्मणक्षत्रियवैश्यशूद्राः, कुलं वंशः पितृपक्षः, तैरूनेषु च्युतेषु विषयभूतेषु। कुलजातिबिकला

१ प्रभृतावऽपसूत्र इति पाठः पुस्तके।

वेश्यादयः, वर्णविकलाः सूतादयः, तेषु यदि । भुंक्ते—अभ्यवहरति । अजानन्—अनवबुद्ध्यमानः । प्रमादतः—कथंचिदेकवारं । तदानीं तस्य, सोपस्थानं—सप्रतिक्रमणं । चतुर्थं—उपवासः । स्यात्—भवेत् । मासः—मासिकं प्रायश्चित्तं भवति । [1]अनाभोगतः—अनाभोगेन अप्रकाशेन । मुहुः—पुनः पुनः, भुंजानस्य साधोः ॥ ९३ ॥

**जातिवर्णकुलोनेषु भुंजानोऽपि मुहुर्मुहुः ।**
**साभोगेन मुनिर्नूनं मूलभूमिं समश्नुते ॥ ९४ ॥**

जातिवर्णकुलोनेषु—जातिवर्णकुलगर्हितेषु । भुंजानोऽपि—अश्नंश्च । मुहुर्मुहुः—पौनःपुन्यात् । साभोगेन—सप्रकाशतः । मुनिः—साधुः । नूनं—निश्चितं । मूलभूमिं—मूलस्थानं । समश्नुते—प्राप्नोति ॥ ९४ ॥

**चतुर्विधमथाहारं देयं यः प्रतिषेधयेत् ।**
**प्रमादाद्दुष्टभावाच्च क्षमोपस्थानमासिके ॥ ९५ ॥**

चतुर्विधमथाहारं—अथ अथवा, चतुर्विधं चतुष्प्रकारं अशनपानखाद्यस्वाद्यभेदात्, आहारं भोजनं । देयं—दीयमानं । यः—कश्चिन्मुनिः । प्रतिषेधयेत्—निवारयति । प्रमादात्—विस्मरणात् । दुष्टभावाच्च—दौर्जन्यात्, तदा प्रत्येकं । क्षमा—उपवासः । उपस्थानमासिके—उपस्थानं प्रतिक्रमणं, मासिकं पंचकल्याणं एते द्वे । प्रमादाद्विनिवारयतः उपवासः प्रायश्चित्तं । प्रद्वेषात् सप्रतिक्रमणं सामायिकं ( मासिकं ) भवति ॥ ९५ ॥

**ज्ञानोपध्यौषधं वाथ देयं यः प्रतिषेधयेत् ।**
**प्रमादेनापि मासः स्यात् साध्वावासमथो मुहुः ॥ ९६ ॥**

ज्ञानोपध्यौषधं वाथ—अथवा ज्ञानोपधिं ज्ञानोपकरणं पुस्तकं, औषधं भेषजं । देयं—वितीर्यमाणं । यः—पुरुषः । प्रतिषेधयेत्—निषेधयति ।

---

१ अनाभोगेन इति पाठः पुस्तके ।

प्रमादेनापि—एकवारमपि तस्य । मासः स्यात्—पंचकल्याणं प्रायश्चित्तं भवति । साध्वावासमथो मुहुः—अथो अथवा, साध्वावासं साधूनां यतीनां देयमावासं आवसतिं, मुहुः पुनः पुनः, यदि निषेधयति तदापि मासिकमेव भवति ॥ ९६ ॥

**चतुर्विधं कदाहारं तैलाम्लादि न वल्भते ।**
**आलोचना तनूत्सर्ग उपवासोऽस्य दण्डनम् ॥ ९७ ॥**

चतुर्विधं—चतुर्भेदं । कदाहारं—कदन्नं । तैलाम्लादि—तैलकंजिकादि, दीयमानं व्याधिप्रभृतिकारणमन्तरेणापि । न वल्भते—न भुंक्ते । आलोचना—। तनूत्सर्गः—कायोत्सर्गः । उपवासश्चेत्येतानि । अस्य—एतस्य पुरुषस्य । दण्डनं—प्रायश्चित्तं भवति ॥ ९७ ॥

**वैयावृत्यानुमोदेऽपि तद्द्रव्यस्थापनादिके ।**
**पथ्यस्यानयने सम्यक् सप्ताहादुपसंस्थितिः ॥ ९८ ॥**

वैयावृत्यानुमोदेऽपि—वैयावृत्यं शरीराहारौषधादिभिरुपकारकरणं तस्यानुमोदे मन्दग्लानादिकारणसमाश्रयादनुमतौ च सत्यां । तद्द्रव्यस्थापनादिके—तस्य वैयावृत्यस्य, द्रव्याणां भाजनप्रभृतीनां, स्थापनादिके निधानधावनबन्धनादिक्रियाविशेषे कृते । पथ्यस्यानयने आतुरोचिताहारविशेषोपढौकने च । सम्यक्—प्रयत्नेन । सप्ताहात्—सप्तरात्रादनन्तरं । उपसंस्थितिः—उपस्थानं प्रतिक्रमणं प्रायश्चित्तं भवति । उपवासोऽनुक्तोऽपि लभ्यते तदविनाभावात् प्रतिक्रमणायाः ॥ ९८ ॥

**स्वच्छन्दशयनाहारः प्रमाद्यन् करणे व्रते ।**
**द्वयोरप्यविशुद्धित्वाद्वारणीयस्त्रिरात्रतः ॥ ९९ ॥**

स्वच्छन्दशयनाहारः—स्वस्यात्मनः, छन्देनेच्छया, शयनशीलपुरुषः स्वमनीषिकया भोजनशीलश्च । प्रमाद्यन्—प्रमादं विदधच्च । करणे व्रते—करणं क्रिया त्रयोदशविधा पंचनमस्काराः षडावश्यकानि आसेधिका

निषेधिकेति[1], व्रतानि पंचमहाव्रतानि तेष्वनादरं वितन्वानः। द्वयोरपि—कारकोपेक्षकयोः । अविशुद्धित्वात्—सदोषित्वाद्धेतोः । वारणीयः—निषेद्धव्यः। त्रिरात्रतः—दिनत्रयानन्तरम् ॥ ९९ ॥

**भूरिमृज्जलतः शौचं यो वा साधुः समाचरेत् ।**
**सोपस्थानोपवासोऽस्य वस्तिवर्ण्यादिकेष्वपि ॥ १०० ॥**

भूरिमृज्जलतः—प्रचुरमृतिकया बहुपानीयेन च । शौचं—विशुद्धिं। यो वा साधुः—वा अथवा, यः साधुर्यो मुनिः। समाचरेत्—( करोति ) ( वस्तिवर्ण्यादिकेष्वपि )—वमनविरेचनादिचिकित्साकरणे च।( अस्य—साधोः )। सोपस्थानोपवासो—भवति ॥ १०० ॥

**चण्डालसंकरे स्पृष्टे पृष्टे देहेऽपि मासिकम् ।**
**तदेव द्विगुणं भुक्ते सोपस्थानं निगद्यते ॥ १०१ ॥**

चण्डालसंकरे—चाण्डालादिभिः संकरे व्यतिकरे, संस्पृष्टे सति भवति विद्यमाने। पृष्टे देहेपि—शरीरे पृष्टेऽपि उपचितेऽपि। मासिकं—पंचकल्याणं प्रायश्चित्तं । ( तदेव ) द्विगुणं भुक्ते—अजानानेन चाण्डालादीनां हस्तेन तद्दर्शने वा अभ्यवहृते सति ( तदेव पूर्वोक्तं प्रायश्चित्तं। द्विगुणं ) सोपस्थानं—सप्रतिक्रमणं। निगद्यते—अभिधीयते ॥ १०१ ॥

**असन्तं वाथ सन्तं वा छायाघातमवाप्नुयात् ।**
**यत्र देशे स मोक्तव्यः प्रायश्चित्तं भवेदपि ॥ १०२ ॥**

असन्तं वा—अविद्यमानं वा। अथ वा सन्तं—सद्भूतं । छायाघातं—माहात्म्यविनाशनं अपमानं । आप्नुयात्—आलभते। यत्र—यस्मिन् । देशे—विषये । स मोक्तव्यः—स पूर्वोक्तो देशः मोक्तव्यः परिहार्यः ( प्रायश्चित्तं भवेदापि )—प्रायश्चित्तं च तथा स्यात् ॥ १०२ ॥

---

१ निषद्येति पुस्तके।

**दोषानालोचितान् पापो यः साधुः संप्रकाशयेत् ।**
**मासिकं तस्य दातव्यं निश्चयोद्दण्डदण्डनम् ॥ १०३ ॥**

दोषान्—अपराधान् । आलोचितान्—निवेदितान् । पापः—पापिष्ठः । यः—कश्चित् । साधुः— । संप्रकाशयेत्—लोकेभ्यः परिकथयेत् तस्य भर्द्वं विदध्यात् । मासिकं तस्य दातव्यं—पंचकल्याणं तस्य साधोर्देयं । निश्चयोद्दण्डदण्डनं—निश्चयेन नियमेन, उद्दण्डं उद्धत्तं, दण्डनं प्रायश्चित्तम् ॥ १०३ ॥

**स्वकं गच्छं विनिर्मुच्य परं गच्छमुपाददन् ।**
**अर्धेनासौ समाच्छेद्यः प्रव्रज्यायाः विसंशयम् ॥ १०४ ॥**

स्वकं—स्वकीयं यत्र दीक्षितः तं । गच्छं—गणं । विनिर्मुच्य—परित्यज्य । परं गच्छमुपाददत्— गृह्णन् । अर्द्धेनासौ समाछेद्यः प्रव्रज्यायाः—दीक्षाया अर्द्धांशेन, असौ स साधुः, समाछेद्यः खण्डयितव्यः । विसंशयं—निःसन्देहम् ॥ १०४ ॥

**यः परेषां समादत्ते शिष्यं सम्यक् प्रतिष्ठितम् ।**
**मासिकं तस्य दातव्यं मार्गमूढस्य दण्डनम् ॥ १०५ ॥**

यः—कश्चिदाचार्यः । परेषां—अन्येषां साधूनां । समादत्ते—स्वीकरोति । शिष्यं—विनेयमन्तेवासिनं । सम्यक्प्रतिष्ठितं—सम्यग्विधानेन रत्नत्रये व्यवस्थितं । मासिकं तस्य दातव्यं—तस्य पूर्वोक्तस्य परशिष्यादायिनः, मासिकं पंचकल्याणं, दातव्यं देयं । मार्गमूढस्य दण्डनं—प्रायश्चित्तम् ॥ १०५ ॥

**ब्राह्मणाः क्षत्रिया वैश्या योग्याः सर्वज्ञदीक्षणे ।**
**कुलहीने न दीक्षास्ति जिनेन्द्रोद्दिष्टशासने ॥ १०६ ॥**

ब्राह्मणाः—विप्राः । क्षत्रियाः—राजानः । वैश्याः—वणिजः, कृतयुगादिव्यवस्थापितवर्णत्रयसमुत्पन्नाः । योग्याः— उचिता अर्हाः । सर्वज्ञदी-

क्षायां—निर्ग्रन्थलिंगस्य। कुलहीने—कुलविकले वर्णत्रयपरिच्युते। न दीक्षास्ति—निर्ग्रन्थलिंगं न भवति। जिनेन्द्रोद्दिष्टशासने—जिनेन्द्रोपदिष्टदर्शने। उक्तं च—

त्रिषु वर्णेष्वेकतमः कल्याणं ( णां ) गः तपःसहो वयसा।
सुमुखः कुत्सारहितो दीक्षाग्रहणे पुमान् योग्यः॥ इत्यादि।

**न्यक्कुलानामचेलैकदीक्षादायी दिगम्बरः।**
**जिनाज्ञाकोपनोनन्तसंसारः समुदाहृतः॥ १०७॥**

न्यक्कुलानां—नीचकुलानां वर्णत्रयबहिर्भूतानां। अचेलैकदीक्षादायी—अचेलां निर्ग्रन्थां, एकां सकलजगत्प्रधानभूतां, दीक्षां प्रव्रज्यां ददातीत्येवं शीलः। दिगम्बरः—साधुः। जिनाज्ञाकोपनः सर्वज्ञवचनप्रतिकूलः। अनन्तसंसारः—अपर्यन्तभवसन्ततिः। समुदाहृतः—परिकथितः॥ १०७॥

**दीक्षां नीचकुलं जानन् गौरवाच्छिष्यमोहतः।**
**यो ददात्यथ गृह्णाति धर्मोद्दाहो द्वयोरपि॥ १०८॥**

दीक्षां—प्रव्रज्यां। नीचकुलं—भ्रष्टकुलं। जानन्—अवगच्छन्नपि। गौरवात्—ऋद्धिगर्वात्। शिष्यमोहतः—शिष्यस्नेहात्। यो—यः साधुः। ददाति—निर्ग्रन्थलिंगं प्रयच्छति। अथ गृह्णाति—अथवा यः पुरुषो निर्ग्रन्थरूपमाददाति। तयोः, धर्मोद्दाहः—चतुर्वर्णोपतप्तिः धर्मदूषणं। द्वयोरपि—उभयोश्च आदातृगृहीत्रोर्भवति॥ १०८॥

**अजानाने न दोषोऽस्ति ज्ञाते सति विवर्जयेत्।**
**आचार्योऽपि स मोक्तव्यः साधुवर्गैरतोऽन्यथा॥ १०९॥**

अतोऽन्यथा—अतः एतस्मान्न्यायात् सकाशात्, अन्यथा अन्येन विधिना। स—पूर्वोक्तः। आचार्यः—सूरिः। मोक्तव्यः—त्याज्यः। साधुवर्गैः—साधुसमूहैः॥ १०९॥

---

१ पूर्वार्धस्य टीकापाठः त्रुटितोऽवभाति, सुगमः।

१०

**शिष्ये तस्मिन् परित्यक्ते देयो मासोऽस्य दण्डनम् ।**
**चाण्डालाभोज्यकारूणां दीक्षणे द्विगुणं च तत् ॥ ११० ॥**

शिष्ये—विनेये । तस्मिन्—पूर्वोद्दिष्टे अकुलीने । परित्यक्ते—परिहृते सति । देयो मासोऽस्य—अस्य एतस्याचार्यस्य, देयो दातव्यः, मासो मासिकं प्रायश्चित्तं । चाण्डालाभोज्यकारूणां—चाण्डालानां मातंगादीनां, अभोज्य-कारूणां अभोज्यानां कारूणां च रजकवरुटकलुपालप्रभृतीनां च । दीक्षणे—दीक्षादाने सति । द्विगुणं च तत्—पूर्वोक्तं मासिकं प्रायश्चित्तं द्विगुणं भवति द्विर्दातव्यं भवति ॥ ११० ॥

**अनाभोगेन चेत्सूरिर्दोषमाप्नोति कुत्रचित् ।**
**अनाभोगेन तच्छेदो वैपरीत्याद्विपर्ययः ॥ १११ ॥**

अनाभोगेन—अप्रकाशेन । चेत्—यदि । सूरिः—आचार्यः । दोषं—अपराधं । आप्नोति । कुत्रचित्—क्वचिदपि तदा । अनाभोगेन तच्छेदः—तस्य आचार्यस्य च्छेदः प्रायश्चित्तं, अनाभोगेनाप्रकाशेनैव भवति । वैपरी-त्याद्विपर्ययः—वैपरीत्यात्तद्व्यत्ययात्, विपर्ययः विपर्यासो भवति–साभोगतः साभोगेनैव प्रायश्चित्तं भवति ॥ १११ ॥

**क्षुल्लकानां च शेषाणां लिंगप्रभ्रंशने सति ।**
**तत्सकाशे पुनर्दीक्षा मूलात् पाषंडिचेलिनाम् ॥ ११२ ॥**

क्षुल्लकानां—सर्वोत्कृष्टश्रावकाणां । शेषाणां च—स्त्रीणामपि आर्याणां । लिंगप्रभ्रंशने—केनापि कारणेन दीक्षाभंगे । सति—विद्यमाने । तत्सकाशे पुनर्दीक्षा—यस्य पार्श्वे पुरा प्रव्रज्या समुपात्ता । तस्यैव सकाशे समीपे पुनरपि दीक्षोपादानं भवति नान्यस्याचार्यस्याभ्यासे । मूलात् पाषंडिचे-लिनां—लिंगवर्जितानां अन्यलिंगिनां, चेलिनां गृहस्थानां मिथ्यादृष्टीनां श्रावकाणां च, मूलात् मूलप्रभृत्येव दीक्षा भवति ॥ ११२ ॥

**कुलीनक्षुल्लकेष्वेव सदा देयं महाव्रतम् ।**
**सल्लेखनोपरूढेषु गणेन्द्रेण गुणेच्छुना ॥ ११३ ॥**

कुलीनक्षुल्लकेष्वेव—कुलीनेषु कुलपुत्रेषु ब्राह्मणक्षत्रियवैश्यविशुद्धोभयकुलसमुत्पन्नेषु व्यङ्गादिकारणसंश्रयात् क्षुल्लकव्रताधिष्ठितेषु सत्सु । सदा—सर्वकालं । देयं—दातव्यं । महाव्रतं—निर्ग्रन्थलिंगं । सल्लेखनोपरूढेषु—संस्तरमाश्रितेषु नान्येषु क्षुल्लकेषु । गणेन्द्रेण—गणधारिणा । गुणेच्छुना—गुणाभिलाषिणा ॥ ११३ ॥

ऋषि-प्रायश्चित्तम् ।

---

**साधूनां यद्वदुद्दिष्टमेवमार्यागणस्य च ।**
**दिनस्थानत्रिकालोनं प्रायश्चित्तं समुच्यते ॥ ११४ ॥**

साधूनां—ऋषीणां । यद्वत्—यथैव । उद्दिष्टं—प्रतिपादितं । एवमार्यागणस्य च—आर्यागणस्यापि संयतिकासमूहस्य च एवमेव प्रायश्चित्तं भवति । अयं तु विशेषः, दिनस्थानत्रिकालोनं—दिनस्थानं दिवसप्रतिमायोगः, त्रिकालः त्रिकालयोगः, ताभ्यामूनं हीनं रहितं । प्रायश्चित्तं—विशुद्धिः । समुच्यते—अभिधीयते ॥ ११४ ॥

**समाचारसमुद्दिष्टविशेषभ्रंशने पुनः ।**
**स्थैर्यास्थैर्यप्रमादेषु दर्पतः सकृन्मुहुः ॥ ११५ ॥**

समाचारसमुद्दिष्टविशेषभ्रंशने पुनः—समाचारे ये केचन कार्याकार्यमन्तरेण परगृहगमनरोधनस्नपनपचनषड्विधारंभप्रभृतयो विशेषास्तेषां भ्रंशे स्खलने तु सति । स्थैर्यास्थैर्यप्रमादेषु—स्थैर्ये स्थिरत्वे, अस्थैर्ये अस्थिरत्वे, प्रमादे कथंचिद्दोषसम्पन्ने । दर्पतः—अहंकाराच्च । सकृत्—एकवारं । मुहुः—पुनः पुनः । एतेषु यथासंख्यं प्रायश्चित्तानि वक्ष्यन्ते ॥ ११५ ॥

**कायोत्सर्गः क्षमा क्षान्तिः पंचकं पंचकं क्रमात् ।**
**षष्ठं षष्ठं ततो मूलं देयं दक्षगणेशिना ॥ ११६ ॥**

कायोत्सर्गः—तनूत्सर्गः । क्षमा—उपवासः । क्षान्तिः—क्षमणं । पंचकं—कल्याणं । पुनः, पंचकं— । क्रमात्—क्रमेण । षष्ठं—षष्ठं प्रायश्चित्तं । पुनरपि षष्ठमेव । ततो मूलं—तदनन्तरं मूलं पंचकल्याणं । देयं—दातव्यं । दक्षगणेशिना—निपुणगणेन्द्रेण ॥ ११६ ॥

---

१ सप्ताक्षराण्येव पुस्तके ।

**मृज्जलादिप्रमां ज्ञात्वा कुड्यादीनां प्रलेपने ।**
**कायोत्सर्गादिमूलान्तमार्याणां प्रवितीर्यते ॥ ११७ ॥**

मृज्जलादिप्रमां—मृन्मृत्तिका, जलं पानीयं, आदिशब्देनाग्निवायुप्रत्येकानन्तवनस्पतीनां च, प्रमां प्रमाणं । ज्ञात्वा—अवबुध्य । कुड्यादीनां भित्तिभूमिभेषजभाण्डादिद्रव्याणां । प्रलेपने—उपदेहने कृते सति । प्रलेपनग्रहणमुपलक्षणमात्रं तेनाग्निसमारंभादिक्रियाविशेषेषु च सत्सु परिमाणमवगम्य देयं प्रायश्चित्तं । कायोत्सर्गादिमूलान्तं—कायोत्सर्गस्तनूत्सर्गः, तदादि तत्प्रभृति, मूलं पंचकल्याणं, तदन्तं तत्पर्यवसानं । आर्याणां—संयतिकानां । प्रवितीर्यते—प्रदीयते । विडालपदादिमात्रेषु मृत्तिकादिषु कायोत्सर्गः । सर्वोत्कृष्टं पंचकल्याणं भवति मध्ये विकल्पः । उक्तं च—

पुढविं विडालपयमेत्तमक्खणंतो जलंजलिं तह य ।
दीवयसिहापमाणं हुयासणं विज्जवंतो य ॥ १ ॥
वियणेणं वीयंतो वाराओ दुण्णि तिण्णि वा होई ।
एक्कं हि य बहुदोसे काउस्सग्गो वि तं लहई ॥ २ ॥

**वस्त्रस्य क्षालने घाते विशोषस्तनुसर्जनम् ।**
**प्रासुकतोयेन पात्रस्य धावने प्रणिगद्यते ॥ ११८ ॥**

वस्त्रस्य—चीवरस्य । क्षालने—धावने । घाते—अपां अप्कायिकानां घाते विराधने सति । विशोषः—विशोषणमुपवासः प्रायश्चित्तं । तनुसर्जनं—कायोत्सर्गः । प्रासुकतोयेन—प्रासुकपानीयेन । पात्रस्य—भिक्षाभाण्डस्य । धावने—प्रक्षालने कृते सति । प्रणिगद्यते—परिकीर्त्यत इति यथाक्रमं योज्यम् ॥ ११८ ॥

**वस्त्रयुग्मं सुबीभत्सलिंगप्रच्छादनाय च ।**
**आर्याणां संकल्पेन तृतीये मूलमिष्यते ॥ ११९ ॥**

वस्त्रयुग्मं—वस्त्रयुगलं । सुबीभत्सलिंगप्रच्छादनाय—सुबीभत्सं सुष्ठु बीभत्समदर्शनीयं, लिंगं रूपं, तस्य प्रच्छादनाय पिधानार्थं । आर्याणां—

तपस्विनीनां, संकल्पेन—संप्रकल्पिते धृते । तृतीये मूलमिष्यते—तृतीये वस्त्रे गृहीते सति आर्याणां, मूलं मासिकं, इष्यते निश्चीयते ॥ ११९ ॥

**याचितायाचितं वस्त्रं भैक्ष्यं च न निषिद्ध्यते ।**
**दोषाकीर्णतयार्याणामप्रासुकविवर्जितम् ॥ १२० ॥**

याचितं—भिक्षितं, अयाचितं—स्वयमेवोपलब्धं च । वस्त्रं—अम्बरं । भैक्ष्यं—भिक्षाणां समुहश्च । न निषिध्यते—न निवार्यते । दोषाकीर्ण-तया—दोषबाहुल्येन हेतुभूतेन । आर्याणां—विरतिकानां । अप्रासुकवि-वर्जितं—सावद्यविरहितम् ॥ १२० ॥

**तरुणी तरुणेनामा शयनं गमनं स्थितिम् ।**
**विदधाति ध्रुवं तस्याः क्षमाणां त्रिंशदाहृता ॥ १२१ ॥**

तरुणी—युवतिर्यौवनस्था । तरुणेन—यूना । अमा—सह । शयनं—स्वापं । गमनं—यानं । स्थितिं—स्थानं कायोत्सर्गं सहासनं वा । या आर्या, विदधाति—करोति । ध्रुवं—निश्चितं । तस्याः—पूर्वोक्तायाः संयतिकायाः । क्षमाणां—क्षमणानां । त्रिंशत्, आहृता—उदाहृता परिकथिता ॥ १२१ ॥

**तारुण्यं च पुनः स्त्रीणां षष्ठिवर्षाण्यनूदितम् ।**
**तावन्तमपि ताः कालं रक्षणीयाः प्रयत्नतः ॥ १२२ ॥**

तारुण्यं च पुनः—तरुणत्वं यौवनं तु । स्त्रीणां—योषाणां । षष्ठिव-र्षाणि—षष्ठिसंवत्सरान् यावत् । अनूदितं—अनूक्तं कथितं । तावन्तमपि ताः कालं—तावन्तमपि तावन्तं च, ता आर्यकाः, कालं समयं षष्ठिवर्षप्रमाणं । रक्षणीयाः—पालनीयाः । प्रयत्नतः—तात्पर्यात् ॥ १२२ ॥

**दर्पेण संयुताथार्या विधत्ते दन्तधावनं ।**
**रसानां स्यात् परित्यागश्चतुर्मासानसंशयम् ॥ १२३ ॥**

दर्पेण—अहंकारेण । संयुता—समन्विता । अथ—अथवा । आर्या—विरतिका । विधत्ते—करोति । दन्तधावनं—दन्तघर्षणं । यदि तदा ।

रसानां स्यात्—भवेत् । परित्यागः—परिवर्जनं । चतुर्मासान् ( चतुरः ) त्रिंशद्रात्रान् यावत् । असंशयं—निःसन्देहम् ॥ १२३ ॥

**अब्रम्हसंयुता क्षिप्रमपनेयापि देशतः ।**

**सा विशुद्धिबहिर्भूता कुलधर्मविनाशिका ॥ १२४ ॥**

अब्रह्मसंयुता—अब्रह्मणा मैथुनेन संयुता संगता । क्षिप्रं—शीघ्रं । अपनेया—निर्घाटनीया । अपि देशतः—आस्तां तावद्ग्रामादेः देशादपि तद्विषयादपि उद्वासनीया । सा विशुद्धिबहिर्भूता—सा पूर्वोक्ता संयतिकारूपधारिणी, विशुद्धिबहिर्भूता प्रायश्चित्तविवर्जिता । कुलधर्मविनाशिका—कुलं गुरुकुलं च धर्मो जिनशासनं तयोर्विनाशिका दूषिका ॥ १२४ ॥

**तद्दोषभेदवादोऽपि पण्डितानां न कल्पते ।**

**अन्योक्तं लक्षणीयं न तत्प्रहेयं प्रयत्नतः ॥ १२५ ॥**

तद्दोषभेदवादोऽपि—तस्य पूर्वोक्तसंयमविषयस्य दोषस्य भेदवादः प्रकाशनं च । पण्डितानां—सम्यग्ज्ञानवतां पुरुषाणां । न कल्पते—न युज्यते । अन्योक्तं लक्षणीयं न—अन्यैरपि कैश्चिदुक्तमभिहितमपि लक्षणीयं न—न लक्षणीयं न लक्षयितव्यं नोपलक्षणीयं । तत्प्रहेयं—तज्जल्पनकं, प्रहेयं परित्याज्यमेव । प्रयत्नतः—अत्यन्ततात्पर्यात् ॥ १२५ ॥

**यतिरूपेण वाच्याप्ता चेदार्यानामधारिका ।**

**हा ! हा ! कष्टं महापापं न श्रोतुमपि युज्यते ॥ १२६ ॥**

यतिरूपेण—संयतनामधारिणा सह । वाच्याप्ता चेत्—यदि वाच्याप्ता वाच्यं जल्पनकं, आप्ता प्राप्ता, भवति । आर्यानामधारिका—विरतिकाभिधानवाहिका । हा हा कष्टं—हा हा धिग्धिक्, कष्टं निकृष्टं । महापापं—महापातकं । तत्तेन, श्रोतुमपि न युज्यते—आस्तां तावज्जल्पनं संप्रश्नो वा श्रोतुमपि आकर्णयितुमपि न युज्यते न कल्पते न वर्तते ॥ १२६ ॥

**उभयोरपि नो नाम ग्राह्यं धिङ्नीचकर्मणोः ।**

**अन्यश्चेत्कोऽपि तद्ब्रूयात् पिधातव्ये ततः श्रुती ॥ १२७ ॥**

उभयोरपि—द्वयोरपि रूपधारिणोः। नो नाम ग्राह्यं—नामाभिधानं नो ग्राह्यं नादेयं न वक्तव्यं। धिक्—कष्टं। नीचकर्मणोः—निकृष्ट-चेष्टयोः। अन्यश्चेत्कोऽपि तद्ब्रूयात्—चेद्यदि, अन्यः कोऽपि अपरश्च कश्चित्, तत्पूर्वोक्तं दूषणं, ब्रूयाज्जल्पति। पिधातव्ये ततः श्रुती—पिधातव्ये छादयितव्ये, ततस्तदनन्तरं, श्रुती कर्णौ ॥ १२७ ॥

**स नीचोऽप्यश्नुते शुद्धिं शुद्धबुद्धिः प्रयत्नतः।**
**देशकालान्तरात्तत्र लोकभावमवेत्य च ॥ १२८ ॥**

सः—पूर्वोक्तसंयमरूपानुकारी। नीचोऽपि—अधर्मोऽपि। अश्नुते—प्राप्नोति। शुद्धिं—प्रायश्चित्तं। शुद्धबुद्धिः—विविक्तमतिः सन्। प्रय-त्नतः—प्रयत्नेन सम्यग्विधानेन। देशकालान्तरात्—कालान्तरे महति कालेऽतिक्रान्ते। तत्र लोकभावमवेत्य च—तत्र देशे यत्र प्रायश्चित्तं तस्य प्रदीयते, लोकभावं जनपरिणामं, अवेत्य च परिज्ञायापि अस्मिन् देशे दोषं न तावत्कोऽपि परिगृह्णातीति सम्यगवगम्य। अनेन विधानेनास्य विशुद्धिर्विधीयते ॥ १२८ ॥

**शपथं कारयित्वाथ क्रियामपि विशेषतः।**
**बहूनि क्षमाणान्यस्य देयानि गणधारिणा ॥ १२९ ॥**

शपथं—कोशं। कारयित्वा—विधाप्य। अथ—अनन्तरं। क्रिया-मपि—प्रतिक्रमणं च। विशेषतः—सविशेषं। बहूनि क्षमणानि—बहव उपवासाः। अस्य—एतस्य साधोः। देयानि—दातव्यानि। गणधा-रिणा—गणधरेण ॥ १२९ ॥

**द्रव्यं चेद्धस्तगं किंचिद्बन्धुभ्यो विनिवेदयेत्।**
**तदास्याः षष्ठमुद्दिष्टं सोपस्थानं विशोधनम् ॥ १३० ॥**

द्रव्यं—वित्तं। चेत्—यदि। हस्तगं—करस्थं। किंचित्—किमपि हिरण्यसुवर्णादि यत्तत्। बन्धुभ्यः—स्वजनेभ्यः। विनिवेदयेत्—प्रयच्छति। तदा—तस्मिन् काले। अस्याः—एतस्या आर्यायाः। षष्ठं—षष्ठं प्राय-

श्चित्तं । उद्दिष्टं—कथितं । सोपस्थानं—सप्रतिक्रमणं । विशोधनं—मलहरणम् ॥ १३० ॥

**येन केनापि तल्लब्धं पुनर्द्रव्यं च किंचन ।**
**वैयावृत्यं प्रकर्तव्यं भवेत्तेन प्रयत्नतः ॥ १३१ ॥**

येन केनापि—येन केनचिदुपायेन । तत्—पूर्वोक्तं । लब्धं—प्राप्तं । पुनः—पुनरपि भूयः । द्रव्यं च—धनमपि । किंचन—कियदपि । वैयावृत्यं प्रकर्तव्यं भवेत्तेन—तेनार्थेन, वैयावृत्यं धर्मप्राणिनामुपकारः, प्रकर्तव्यं विधेयं, भवेत् स्यात् । प्रयत्नतः—प्रयत्नान्निराबाधं । तदेव तस्याः प्रायश्चित्तम् ॥ १३१ ॥

**भ्रातरं पितरं मुक्त्वा चान्येनापि सधर्मणा ।**
**स्थानगत्यादिकं कुर्यात् सधर्मा छेदभागपि ॥ १३२ ॥**

भ्रातरं—सहोदरं । पितरं—जनकं । मुक्त्वा—परित्यज्य । अन्येन—परेण । अपि सधर्मणा—सधर्मणापि आस्तां तावदन्येन पुरुषेण गुरुभ्रात्रापि सह यदि, स्थानगत्यादिकं—स्थानं कायोत्सर्गं, गतिर्यानं मार्गगमनं, आदिशब्देनागमनं सहस्थितिप्रभृतिं च एकाकिनी, कुर्यात्—विधत्ते तदानीं, सधर्मा छेदभागपि—आस्तां तावदार्या सधर्मापि गुरुभ्रातापि, छेदभाक् प्रायश्चित्तभागी भवति ॥ १३२ ॥

**बहून् पक्षांश्च मासांश्च तस्या देया क्षमा भवेत् ।**
**बलं भावं वयो ज्ञात्वा तथा सापि समाचरेत् ॥ १३३ ॥**

बहून्—अनेकान् । पक्षान्—पंचदशरात्रान् । मासांश्च—त्रिंशद्रात्रानपि । तस्याः—पूर्वोक्ताया आर्यायाः । देया—दातव्या । क्षमा—क्षमणं । भवेत्—स्यात् । बलं—सामर्थ्यं स्थाम । भावं—परिणामं तीव्रमन्दमध्यमविशेषविशिष्टैः । वयः—दशां । ज्ञात्वा—अवगम्य । तथा—तेनैव न्यायेन । सापि—प्रागभिहितार्या च । समाचरेत्—कुर्यात् ॥ १३३ ॥

**क्षान्त्या पुष्पं प्रपश्यन्त्या तद्दिनात् स्याच्चतुर्दिनम् ।**
**आचाम्लनीरसाहारः कर्तव्या चाथवा क्षमा ॥ १३४ ॥**

क्षान्त्या—आर्यया । पुष्पं—रजः । प्रपश्यन्त्या—अवलोकमानया । तद्दिनात्—यस्मिन् दिवसे तद्दृष्टं तस्माद्दिनाद्दिवसात् प्रभृति । स्यात्–भवेत् । चतुर्दिनं—दिनचतुष्टयं । आचाम्लं—असंस्कृतकंजिकभोजनं । नीरसाहारः—निर्गता रसा विकृतयः तिक्तकटुकादयो यस्मादसौ नीरसः स चासौ आहारः निर्विकृतिः, यथासिद्धस्य रूक्षाहारस्य भोजनं तक्रेण वा शक्त्यपेक्षया । कर्तव्या—करणीया । चाथवा क्षमा—अथवा क्षमा क्षमणं ॥ १३४ ॥

**तदा तस्याः समुद्दिष्टा मौनेनावश्यकक्रिया ।**
